तिः॥ पौष्णादितौ हस्ताश्विन्याहुर्वामवदैष्णवा॥ रोहिणी मैत्रं तिष्याश्ववरुणश्चोत्तरात्रयं। वापर्येवं वसुना
ध्येतेषोऽन्नप्राशने शुभाः॥ पौष्णं रेवती॥ अदितिः पुनर्वसुः॥ इंदुर्मृगः॥ त्वाष्ट्रं चित्रा॥ वासवं धनिष्ठा॥ वैष्ण ३०
वं श्रवणः॥ मैत्रमनुराधा॥ वारुणं शततारका॥ वापर्यं स्वाती॥ अत्रान्यत् हेमाद्रिदिव्यतिथ्यादि कल्प

तेऽज्ञि प्रयोगपारिजाते॥ आश्वलायनगृह्ये॥ षष्ठे मास्यन्नप्राशनमाजमन्नाद्यकामस्तैत्तिरं ब्रह्मवर्चसका
मो घृतौदनं तेजस्कामो दध्योदनमिंद्रियकामो मध्वोदनमाप्रश्नकामो दधिमधुघृतमिश्रमन्नं प्राशयेत्सर्व
कानो न वतां तिविज्ञापते स्त्वपते त्वस्य नोधेह्यनमीवस्य शुष्मिणः। प्रप्रदातारं तारिष ऊर्जं नो धेहि द्वि प
दे चतुष्पद इत्यान्नेन वक्तुमार्येऽति। अत्र प्राशनस्य फलमुक्तमाश्वलायनस्मृतौ॥ स्वमल प्राशनाच्छुध्ये
ग्राशपंचापुष्पे पिनाऽस्य तत्र प्राशनं। अथ जीविकापरीक्षा॥ मार्कंडेयः॥ देवानप्रतोय विन्यस्य शिल्पभांडा
नि सर्वशः। वस्त्राणि चैव शास्त्राणि ततः पश्येत्तु लक्षणं। प्रथमं यत्स्पृशेद्बालस्ततो भांडं स्वयं तदा। जीवि
कात्वस्य बालस्य तेनैव तु भविष्यति। शिल्पस्य लेखनादि। भांडानि लेखनी मषीपात्रादि। इति जीविकाप
रीक्षा। अथाब्दपूर्तिविधिः॥ ब्राह्मे॥ ह्यब्दे पूर्णे चैव जन्मर्क्षे स्नातानुर्यानरोत्तमं। मत्स्याज्यदधिसंयुक्तान्

मृत्युंजयेन तु। अनुरूपा च सहस्रं वा अष्टाविंशतिमाहुतीः॥ ततोपराह्णे संप्राप्ते कृत्वा कौतुकमंगलं। अद
स्नानं प्रकुर्वीत नक्षत्राधिपपूजनं। आयुष्यहोमं कृत्वा च श्रोत्रियानथ भोजयेत्। दत्वा गोभूहिरण्यादि
तथा स्वर्णादिनिर्मितं। बध्नीयात्कटिसूत्रं च वस्त्रं च परिधापयेत्। अत्र कटिसूत्रबंधनं गृहस्थातिरिक्तस्य।
रौप्यं कार्पासिकं हैमं। पट्टसूत्रकृतं वा वा वर्जयेत्कर्मकालेषु कार्यो विप्रा विशेषतः इति तद्धर्मप्रकरणे
आश्वलायनस्मृतौ॥ आयुष्यहोमसूक्तः शौनकेन। अथाज्यभागपर्यंतं कृत्वा पलेपतादिकं। कृत्वा चैव तु
याज्ञस्य गवदानस्य संपदा। अग्नेर्नक्षत्रदेवतासूक्तं दशकेन वा। इमं स्तोममर्हते इत्यष्टवा षोडशके
न वा। एकया ज्ञानवेदस्या कृत्वा स्विष्टकृतं ततः। होमशेषं समाप्याथ ब्राह्मणान्भोजयेत्ततः इति। विशेष ३१
माह नृसिंहः॥ सौरेणाब्दांतजन्मर्क्षे द्वितीयेब्दे स्त्राप्य आस्वतः। आवश्यहोमसूत्रं कारयेद्धावरकं लके।

नवहोमं वरादातिययाईधरपेन्नदेति। राज्ञो विशेषमाह वृद्धगर्गः॥ आयुष्यहोमं कृत्वा च दिग्गीशान
चंयिदुवः। देवांश्च वैदिकान्विप्रान्गुरुं चैव सुपूजनं। प्रणम्य पूजयेद्दिव्यैर्धूपमाल्यानुलेपनैः। वीन
वस्त्रैराभरणैश्चैव पूर्णकुंभेन वस्त्रभूषणैः। गुरुं प्रमाणं कृत्वा वराज्ञातुमर्हति सर्वदा। निगडस्थो विमुच्याथ
मनुजान्निगडैर्युतान्। अन्यानि पुण्यकर्माणि प्रकुर्वीत यथाविधि। इत्यब्दपूर्तिविधिः॥ अथ चूडा
कर्म॥ यमः॥ ततः संवत्सरे पूर्णे चूडाकर्म विधीयते। द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात्। हरणे
पूर्तिदिने। अब्दपूर्णे इति वा छेदः। तेन प्रथमस्य सर्थाः गुरुः। तृतीये द्विशिखो गर्भजन्मतो वा विशेषतः। पंच
मे सप्तमे वापि स्त्रियाः पुंसोथ वा समं। अत्र तृतीयादिविषमं स्त्रीपुंसयोः सर्वं इति पादिसमं त्वनुकल्पः।
नारदः॥ जन्मतस्तु तृतीये वे श्रेष्ठमिच्छंति पंडिताः। पंचमे सप्तमे चैव जन्मतो मध्यमं भवेत्। अधमं गर्भतः

स्यात्तु दशम्यामेकादश्योपि वा ॥ आश्वलायनगृह्यकारिकायां ॥ ततो यवष्मरे चौलं कुर्वीत स्योत्तरायणे । शुक्लप
क्षे शुभनक्षत्रे तु त्रित्वा स्युदपि कं तथा । यथा च यवाकेषां विड्पनात्याम देष्यते । ततः पश्यत्र विशेषमाह लौगा
क्षिः ॥ तनीयस्य वर्षस्य तृतीयेष्टगते चूडां कारयेदिति तृतीयेष्टः वर्धाधिके । तन्नायननागे इति प्रयोगपारिजाते ॥ अत्रा
पितनकृत्यानुसारेणव्यवस्था । तदनावेसमविकल्पः । तदाह्यपाह व्यासः ॥ अश्विनी श्रवणा स्वाती चित्रानि
थः पुनर्वसुः । धनिष्ठा रेवती ज्येष्ठा मृग हस्तेषु कारयेत् । चौलमिति शेषः ॥ निषिद्धान्यपि मरणवाहनक्षत्रेषु न कु
र्यात् नयस्मि चजातो नवेनरः । न घोषपद्योः कार्यं नवाग्नेयेव नारत । अथ तिथयः । धर्मप्रकाशे द्वितीयां पंच
मी सप्तम्यामेकादश्यां तथैव च । दशम्यां चत्रयोदश्यां कार्यं क्षौरं विजानता । पक्षाच्छ्रांवनवमी मार्गाण्पं चदशी । ३२
तथा । दिवा चुतिथयः सर्वाः प्रशस्ताः क्षौरकर्मणि । पक्षच्छिद्रामक्तान्यामेतेः ॥ व्यासः ॥ निषिद्ध प्रतिपदंरिक्तां वि

ष्टिं चैव विवर्जयेत् । वारंचानैश्च्रगादित्यभौमानां रात्रिमेव च । अयराशयः ॥ वसिष्ठः ॥ वृषनक्रकुलीरस्थ
यमकन्या तुलाधराः । मकरश्चैव मीनश्च क्षौरकर्मणि शस्ता । मेषेऽकरवौ मृगेंद्रे च वृश्चिके व्ययमेन मदन ।
राङ्वाश्चव धनुमिस्तु न युक्तेन दुष्यति । यमं मिथुनं ॥ लौगाक्षिः ॥ दक्षिणतः कमुजा वसिष्ठानामुभयतोत्रि
कश्यपानां मुंडा भृगवः पंचचूडा अंगिरसो वाल्लिमेके मंगलार्थं शिखिनोन्ये यथाकुलधर्मं वेति । कमुजा चूडा ।
वाल्लिः केशपक्तिः ॥ आपस्तंबः ॥ केशान्छिनायपथर्षिशिखा नियथा वैषां कुलधर्मः स्यादिति । विनायविन
त्य । यथर्षि प्रवरसंख्ययेत्यर्थः ॥ गर्गः ॥ न गुरौ सिंहराशिस्थे सिंहस्थाकगतेपि वा । क्षौरमन्नं न कुर्वीत विवाहं दे
दकर्म वा । एतच्चोद्गयनादिविहितकालमपि गोवरपन्नमंहोत्सरनागेप्यवतिष्ठते ॥ तदुक्तं ॥ नर्मदोत्तरदेशेतु
सिंहस्थे दर्वमंत्रिणि । शुभ कर्मन कुर्वीत निषेधो नास्ति दक्षिणे इति ॥ ज्योतिर्निबंधे ॥ हरनो मतिरिग निर्णयोन्दूहा

कर्मनकारयेत्। पंचाब्दात्प्रागथोर्ध्वं तु गर्भिण्यामपिकारयेत्। सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यते। निषे
धस्त्वपंचममासमारभ्यतिज्ञेयः। यथाह वसिष्ठः॥ गर्भिण्यां मातुः कुमारस्य न कुर्याच्चौलकर्म तु। पंचमासादधः कुर्या
दन्तऊर्ध्वं न कारयेदिति। अत्र लौकिकाग्निरुक्तो वह्निर्वकारिकायां। चौलकर्मणि चयनेविवाहे प्रथमस्तथा। अ
नाहिताग्निमित्यपालौकिकाग्निरिति निश्चितिः॥ याज्ञवल्क्यः॥ तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रकः। ए
ताजातकर्मादिचूडांताः। अत्र मधुप्राशनादौ प्रथमेनेव लक्ष्म्या त्वविधिः। न दंतेगान्युदयिकादावपि। क्रियाह
निप्रथमानिर्देशेन सांगत्वावगमात्। तत्र कन्यानामकर्मादिचूडांते अंगभूतान्युदयिकश्राद्धहोमादि
समंत्रकमेवकार्यं। अतएव चंद्रिकायां गोभिलः तूष्णीमेताः क्रियाः स्त्रीणां मंत्रेण अनुहोमइति। आश्वलायनो ३२
पि कृतलक्षणेनु पुंवत्स्यात्स्त्रीणां चूडा त्वनावपेति। उभयत्रापि होमग्रहणं अंगमात्रोपलक्षणार्थं। पुंवत्स

मंत्रकं। अपिर्नियमः। चूडार्थकृतलक्षमपार्थं। चूडोक्तानामकरणादौ होमानावः सूचितः। जात
कर्मणि त्वान्युदयिकस्यापि केवलं नैमित्तिकत्वस्य प्राकृत्यवस्थापितत्वेनानंगत्वादमंत्रकमेवानुष्ठा
नमित्यलं। इति चूडाकर्म। अथाक्षरारंभस्य कालः॥ श्रीधरः॥ उदक्गते भास्वति पंचमेऽब्दे प्राप्तेक्षरस्वीक
रणं शिशूनां सरस्वतीं विघ्नविनायकं च गुरुं च देवान् गृहैरभ्यर्च्य कुर्यात्। इत्यक्षरारंभः। अथ प्रसंगादनु
पनीतधर्माः॥ गौतमः॥ प्रागुपनयनात्कामचार कामवाद कामभक्षाः इति। कामचार इच्छातो निषिद्धदेशा
दिगमनं। कामवादो अनृतभाषणादि। कामभक्षो लशुनादेर्भक्षणं। न तु मद्यपानस्यापि समर्घत्वाल्लणे
वर्जयेदितिवयादिशापानादरेणज्ञान्येवनिषेधनत्। चंद्रिकायां स्मृत्यंतरे च। स्वात्कारनक्षोक्तिमहितः या
नकादत्तइति। ग्राहकायेऽपि। अनुपनतस्यापि विप्रो मद्यं मोहात्पिवेपदि। तस्य त्रकृच्छ्रं पकार्यं पित्रान्वा

सं०म०३४

त्रापि वालयेति। यत्तु। वैष्णवे॥ नस्नानस्तेतथापेयेवाच्यावाच्येतथानृते। अस्मिन्कालेनदोषःस्यान्मया
वत्नोपनीयतइत्ययमत्र हर्णं नम्मयातिरिक्तपरं दोषाल्पत्वाभिप्रायं वा न पुनः सर्वथादोषाभावोऽत्रार्थश्रा
यस्त्वितरस्मृतिविरोधात्। अपरार्के तु मातापित्रोरथोच्छिष्टं वालानुजन्म वेत्सुधीरिति शातातपोक्तेर
नसाभ्यनुज्ञानं मातापित्रुच्छिष्टविषयमवेत्युक्तं। क्वचित्कामचरत्वस्यापवादमाह यमः॥ वैश्वदेवपुरोडा
शमग्निमथ्यं च यद्धुतं। यद्य घाच्छिन्नुरालब्धमात्रारस्नः अयत्नतइति। वैश्वदेवं वैश्वदे वसिष्ठः॥ कामचारस्या
प्यपवादमाह गौतमः॥ ब्रह्मचारीति। उपनकालातिक्रमेप्यनिचारी नस्यादित्यर्थः॥ वसिष्ठः॥ तदस्य ३४
विद्यते कर्म किंचिदामौञ्जिबंधनात्। वृत्त्याशूद्रसमस्तावद्यावद्वेदेन जायते। मानवे तु द्वस्ववर्द्धितैयेव पठितो
नराइमन्यथापठितं। नाभिव्याहारयेद्ब्रह्मस्वधानिनयनादृते वावद्वेदेनजायते। मानवे तु द्वस्ववर्द्धितयैव पठि

तोत्तरार्द्धमन्यथापठितं। नाभिव्याहारयेद्ब्रह्मस्वधानिनयनादृत इति॥ गौतमः॥ यथोपपादमूत्रपुरीषो
नवालिनतस्याचमनकल्पो विद्यते नन्योरस्तुरवोदिवारात्रौ दक्षिणामुखत्वादयो नियमाः। न तस्याचम
नकल्पः इति आचमनस्यापि निषेधः किंतु तत्प्रकारमात्रस्येत्यर्थः। हरदत्तकौमुद्यामादित्यपुराणे। आर्तः कु
र्यात्यथाशक्ति स्वस्थः कुर्याद्यथोदितं। वालस्यानुपनीतस्य गंधलेपक्षयावधिमिति। प्रकरणेऽत्र शौचमिति शेषः।
स्मृतिदीपिकायां। शिशोरभ्युक्षणं प्रोक्तं वालस्याचमनं स्मृतं। रजस्वलादिसंस्पर्शे स्नातव्यं च कुमारकैः। आ
चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः। कुमारस्तु स विज्ञेयो यावन्मौञ्जीनिबंधनं। रजस्वलादिसंस्पर्शादि
श्वान्यनितादेर्भद्रणं। यथाह गौतमः॥ पतितचंडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्टुपस्पर्शने सचैलमिति।
कुमारपरमप्येतत्त्वयो विशेषानुपादानात्। इत्यनुपनीतधर्माः। अथोपनयनं॥ याज्ञवल्क्यः॥ गर्भाष्टमेद्

मेवाष्टमेब्राह्मणस्योपनायनं।राज्ञामेकादशेसैकेविशामेकेयथाकुलं।सैकेएकादशेद्वादशेइत्यर्थः।पक्षाकु
लं।सर्वेषांकान्यतमस्याप्यनियमइतिकेचित्।कुलस्थित्यावाव्यवस्थितोविकल्पइत्यपरे।एकादशद्वादशयोरपि
गर्भेशब्दानुषंगात्गर्भपंचमेब्राह्मणमुपनयेत्गर्भाष्टमेवागर्भैकादशेराजन्यंगर्भद्वादशेवागर्भद्वादशे
राजन्यंगर्भादशेवागर्भद्वादशेवैश्यंगर्भषोडशेवेतिपैठीनसिस्मृतौगर्भाष्टमेष्टकुर्वीतब्राह्मणस्योपन
यनं।गर्भादेकादशेराज्ञोगर्भात्तुद्वादशेविशइतिमनूक्तेरष्टमवदेकादशादेर्द्विरुक्ताभावाच्चतत्रापिगर्भ
संख्यैववर्षसंख्यानजन्मनइतिकेचित्।मनुनागर्भतइत्युक्तेःपियाज्ञवल्क्येनजन्मतोप्युच्यतेसंयो
गपृथक्त्वन्यायात्नवगर्भपदानुषंगः।तदनन्वितद्वितीयाष्टपदव्यवायात्समासांतर्गतत्वेनाष्टपकप ३५
दत्वाच्चनाप्युपसंहारः गर्भपदाननुषंगेपरिशेषात्जन्मतइव्यवायात्समासांतर्गतत्वेनाष्टमकपदत्वा

च्चनाप्युपसंहारः गर्भपदाननुषंगेपरिशेषात्जन्मतइत्येवतिष्ठित्वेनसामान्यविधित्वानावादिति
तुममतिनातिश्चअतएव लौगाक्षिः।। सप्तमेवर्षेब्राह्मणस्योपनयनंनव।मेराजन्यस्यैकादशेवैश्यस्ये
ति।उशनाअपि।जन्मतःपंचमेवर्षेब्राह्मणस्योपनायनं।राज्ञःषष्ठेवैश्यस्याष्टमेतुबलार्थिनइति।
।।मनुः।। ब्रह्मवर्चसकामस्यकार्यंविप्रस्यपंचमे।विधिक्रम्य पमः।। आयुःकामस्यनवमेकार्यंमौंजीनिबंध
नमिति।।यत्रगौतमः।। नवमेपंचमेवाकाम्यमिति।अनयोरपिविप्रविषयत्वेनैवमानवयाम्यान्यायमुपसंक्षिप
ते।काम्येगर्भाष्टवर्षसंख्यानित्यकाम्योपनयनेउपक्रम्यगर्भादिसंख्यावर्षाणामितितेनैवोक्तत्वात्।सं
गिरा।।षष्ठेतथाष्टादशेचराज्ञोवृद्धिवलापुषोः।ईहापुषोऽस्यवैश्यस्यअष्टमेवचतुर्दशे।ईहालक्ष्यादिवे
क्षा।अत्रयथाक्रमंफलान्वयोज्ञेयः।राज्ञोबलार्थिनःषष्ठेवैश्यस्येहार्थिनोष्टमेइति मनूक्तेः।। परिशेषाद्

युषोद्वादशाच्चतुर्दशापोरन्वघइत्युक्तं विष्णुः॥ षष्ठेतु धनकामस्य विद्याकामस्य सप्तमे। अष्टमे सर्वकाम
स्य नवमे कान्तिमिच्छतः। विप्रप्रकाशायदत्तावा पद्मंदः॥ पंचमे विद्यापुत्रकामः षष्ठे धनकामः सप्तमे ब्रह्मवर्च
सकामोष्टमे आयुष्कामो नवमे तेजस्कामो दशमे त्रयकाम एकादशे इंद्रियकामो द्वादशे पशुकामस्त्रयो
दशे उपकामश्चतुर्दशे पौरुषकामः पंचदशे स्वर्गकामः षोडशे राज्यकाम इति। स्मृतिचंद्रिकायां लत्वअष्टम
वर्षादिद्वादशवर्षांतमेव पतित्वं तद्वर्णत्रयसाधारणं। तदुपनयनोत्तरमस्य विधानादित्युक्तं। हेमाद्रौ तु न
वमादिद्वादशांतमेव वर्णत्रयपरं। सप्तमाष्टमे तु ब्राह्मणपरे। अन्यथामानपपाद्य वाक्यविरोधइत्युक्तं। पि
तामहचरणास्तु गुणफलविधीनां लेषांपाक्षिकप्राप्यनाविनियमविधित्वामंतव्ये नाष्टमे विधित्वात् ब्राह्म ३६
णस्याप्येकत्रस्तव वंसाध्यत्विनपं चंद्रिकाकारमतमेव समर्थितं वंतनतुनैते गुणफलविधयः किं ब्राह्मणा

दीनाम् कामसंयुक्त याज्ञवल्क्यादिवाक्यैः॥ प्राप्ते षष्ठवर्षादिषु फलसंबंधमात्रविधय इति वेत् न एकस्य
तु न पत्वसंयोगपृथक्त्वमितिन्यायेन नित्यकाम्यगुणविधेरेकवाक्यतानभ्युपगमात् ब्राह्मणस्याष्ट
मवर्षमेव मुख्यं अष्टवर्षं ब्राह्मणमुपनयीतेति श्रुतेः। तत्र वाष्टौ वर्षाणि पदा स्मरणानि भवंति तानि भिद्दिने
तदुत्तरं वा श्रुतेस्तु पनयनं कार्यमिति केचित्। तान्वरणस्त्वष्टौ वर्षाणि पश्येत् इति बकुत्र्री हर्षष्टमवर्षप्रवृत्ति
मात्रेणाप्यष्टवर्षसंबंधो सौज्ञानइत्यष्टमवर्षे वर्तमान एव शुनेस्तु पनयनं कार्यमिति निर्द तानि णयपरिशिष्ट
मघ्रपंचमत्रुः क्षत्रिपवेश्यपोस्त्वेकादशद्वादशेमुख्यो। अष्टमसप्तमि याह्रात्र्याज्ञवल्क्यादिषु नवना
दीनि गौणानि। तत्र परमावधिमाह याज्ञवल्क्यः॥ आषोडशाद्द्वाविंशतिचतुर्विंशाद्योरप्यानुपज्यते तन
थाच॥ आश्वलायनगृह्ये॥ आषोडशात् ब्राह्मणस्यानतीतः काल आद्वाविंशात् क्षत्रियस्य आचतुर्विंशा

देश्यस्यातऊर्ध्वंपतितसाविन्नीकानवंतीति। अत्राऊर्ध्वंनिविध्यर्थस्त्वतऊर्ध्वमित्यत्रातःशब्देनानुपात्तमंत्रि
दितपंचदशादिवर्षत्यागेनोपात्तमंत्रिदितषोडशादेरेवपरामर्शइतितनषोडशादौममाप्यनुपनीत
स्यव्रात्यस्तोमइतिकश्चित्। तानवरुणारत्नाषोडशादिस्यत्राऊर्ध्वंमर्थ्यसाविन्नीपतिनायस्यदशवर्षाणि
पंचच। सशिखंवपनंकृत्वाव्रतंकुर्यात्समाहितइतियमेनपंचदशवर्षातिक्रमएवप्रायश्चित्ताभिधानात्।
अत्रषोडशेवर्तमानेऽनुपनीतस्यव्रात्यस्तोम। आद्वाविंशादाचतुर्विंशादित्यत्राऊर्ध्वंनिविध्यर्थएवे
त्याकूर्द्यतन्निरूपिपरिशिष्टेयमवाक्यपंचदशाब्दार्जन्मप्रभृति। याज्ञवल्कीयेषोडशोक्तिस्तुगर्भप्रभृत
त्वितकोपिविरोधइतिलुपिलामदवरणाः। अथायनःवद्धवतःपतउदगयनआपूर्यमाणपक्षेकल्याणेन ३७
क्षत्रेचौलकर्मोपनयनगोदानविवाहाइति। अत्रविप्रक्षत्रिययोरेवोदगयनविधिःनवैश्यापि। विप्रस्यक्षत्रि

यस्यापिमेषंक्षत्रस्याउत्तरायणे। दक्षिणेतुविशांकुर्यात्तानधर्मायेनमंत्रमेइतिवृद्धवशिष्ठेनतस्यदक्षिणा
यनोक्तेः। ऋतुश्चवस्थामाह। आपस्तंबः। वसंतेब्राह्मणमुपनयीतग्रीष्मेराजन्यंशरदिवैश्यमिति। अत्रब्राह्मण
मित्यविशेषोक्तावपियजुःशाखिनांवसंतएवेतिवचनव्यक्तिस्तदन्येषांतुविपरीतेनेतिभाष्यउक्तंपरम
गुरवस्तन्नायपाम्याउत्तराविधश्चरपिग्रीष्मशरन्नियमार्थत्वेनक्रतुर्वसंतःशुभदोब्रजन्मनांग्रीष्मोनृपा
णांवशरद्विशांव। वतस्यवैश्यपदिवारिवलानांमाघाद्यःपंचभवंतिमासाइतिसर्वेषां। अरण्येनमाघादि
पंचमासविधेःशिशिरवासवर्गेनितिनरवाजगृह्येमाध्यरण्येनशिशिरविधेश्चनिर्विषयतापत्तेर्नग्यन
तमपुक्तमितिमत्वाद्विजातीनांवसंतादयोमुख्याःमाघादिविधिस्त्वनुकल्पोयुक्तस्तस्तुशारिववि
प्रादानांवसंतादित्रितयस्यापिनियमार्थत्वेऽपिमाघादिविधेस्तदन्यशारिवविधिद्विगोचरत्वेननिर्विष

सं०म०३८

यज्ञोपवीतिरितित्रमसप्रतिनाति। अत्र वसंतादयो द्विविधाः सौरचांद्रभेदात्। तत्राद्या अपि द्वेधा मीनादित्व
मेषादित्वाभ्यां। अंत्या अपि द्वेधा अमावास्यांतत्वपौर्णमास्यंतत्वभेदात्। चैत्रादित्वात्। तत्र ब्राह्मणा
दीनां वसंतादयः सौरत्वान्मुख्याः। माघादिमासपंचकविधेरथ ब्राह्मणानामन्यथा शिशिरग्रीष्मा ब्राह्मणस्य
गौणौ। शिशिरवसंतौ क्षत्रियस्य शिशिरादपत्त्वयोपि वैश्यस्येति। वसंतश्चैत्रवैशाखौ ग्रीष्मः शुक्रशुची त
था। ज्येष्ठाषाढौ इमामासाः सौरतादि कर्मणि निवारितेषु चांद्रमासवाचिचैत्रादिसंज्ञाघटितवसंतादि
लक्षणोक्तिरूपकमादिग्राह्योपा तस्मात्कर्मण्यपि भवितव्यादिलिंगत्वाच्चैत्रादिमासानां ब्राह्मणादेः सौर
वसंतादिविधिरूपनयने ढंढतपाद्याख्यानामपि ब्राह्मणस्य मीनसंक्रांत्यवच्छिन्नश्चैत्र एव मुख्यः। चैत्रे मीनग ३९
ते रवाविति वदनात्। माघाद्यास्तु गौणाः। क्षत्रियस्य तु ज्येष्ठ एव मुख्यः। माघादिपंचमासविधिताषाढस्य

व्याचरितत्वात्। माघाद्याश्चत्वारो गौणाः। वैश्यस्य तु आश्विनः कार्तिकश्चोत्थानादूर्ध्वं मुख्यः। माघादयः
पंचापि गौणाः। आपस्तंबमते वर्षा काम्य एव। न मुख्यो गौणो वा। माघाद्यास्तु काम्या अपि तथा च चंद्रि
रः। माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः। चैत्रे नवतिमेधावी वैशाखे कोविदो भवेत्। ज्येष्ठे शूर
स्तीतिज्ञः आषाढे क्रतुनाकभवेत्। मार्गशीर्षे नवे कृष्टः शेषेषु रवमवाप्नुयादिति। शोधनाद्यपदं। मार्ग
शीर्षेत्यादिनिंदार्थवादेन मासद्वयनिषेधः कल्प्यते। सच वैश्यपरः। तस्य च आरव्वनकदाचित्त्याज्यत्वमालके
चित्तु माघाद्याः षडपि काम्याः पवः। यथा मासेष्वेवैतेषु फलसंबंधमाचक्षाणात्तत्राप्याषाढो मिथुनाव
च्छिन्न एव ग्राह्यो न कर्कावच्छिन्नः। तत्र पाश्चात्यानोपक्रमेण निषेधदर्शनात्। ॥तत्र॥ चतुर्निर्णयामृते नि
मकाव्यविधेरन्योन्यमेकवाक्यतानिरासात्। वाशिष्ठे मिथुनार्कोपि माईष्यद्दिनोत्तरमुपनयनाद

निषिद्धत्वात् । संस्कार्यविशेषे ज्येष्ठमासं निषेधति गर्गः ॥ ज्येष्ठमासे विशेषेण सर्ववर्ज्यं ह्यस्य वै वदेत् । उप
नीतस्य पुत्रस्य ज्येष्ठस्य मृत्युरेव चेति । संग्रहे । विवाहं चोपनयनं जन्ममासे विवर्जयेत् । विशेषाज्जन्मपक्षे
तु वशिष्ठाद्यैरुदाहृतमिति । जन्ममासस्मावनः । तथा च गर्गः ॥ आरभ्य जन्मदिवसं यावत्त्रिंशद्दिनं नवे
त् । जन्ममासः स विज्ञेयो गर्हितः सर्वकर्मसु इति । एवं वा इत्युक्तं कश्यपेन ॥ उपवासव्रताद्यैश्च पात्रश्चो
गपनापने । तिथिवर्षादिनिरिविलंबाख्यानेलग्नस्य तदिति । जन्मदिनादिमात्रं निषेधति वृद्धगर्गः ॥ जातेऽहि
न दृष्यते वशिष्ठः पंचैव गर्गस्त्रिदिनं तथात्रिः ॥ तज्जन्मपक्षं किल नागुरुस्तु व्रते विवाहे गमने क्षुरे वेति
स्वर्पं च जन्ममासतिथ्यादिनिषेधः क्षत्रियविशोरेव । ब्राह्मणं प्रति तस्याशस्त्यस्योक्तत्वात् । यथाह शौ ३९
नकः ॥ जन्मादपि जन्मसुतारकासु मासे तथा जन्मनि जन्मराशौ । व्रते न विप्रानवकस्तुतोऽपि ज्ञावि

ज्ञेयः प्रपितेः श्रुषिद्धामिति ॥ अथ पक्षः ॥ बृहस्पतिः ॥ शुक्लः पक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं विनेति ।
शुभः प्रचास्मद्व्यर्थः ॥ अतोऽपरार्धमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनं गोदानविवाहाद्या
ग्नलापनेन शुक्लपक्षमात्रमुक्तं तत्पारास्याभिप्रायेणेति हेतुः । बहूवाभिप्रायमिति उत्तमुक्तं । पंच
तिथयः ॥ तत्र नारदः ॥ शुक्लपक्षे द्वितीया च तृतीया पंचमी तथा । त्रयोदशी च दशमी सप्तमी व्रतबंधने । श्रे
ष्ठास्त्वेकादशी षष्ठी द्वादश्येता स्युर्मध्यमाः ॥ एकादश चतुर्थी सत्यज्य कृष्णपक्षेऽपि मध्यमाः ॥ आ पंचम्यास्तु
निषिद्धाः परास्सुरिति निर्दिष्टाः ॥ अत्र सप्तमी त्रयोदश्योर्नैमित्तिक पुनरुपनयने विधेर्न तत्र नक्षत्रयोग
त्वयस्तुत्वेन न निषेधः ॥ सर्वोक्तोस्तु कोऽत्रो । नष्टे चंद्रे भृगौ गुरौ केतौ निरंशे चैव भास्करे । कर्तव्यं नोपनयनम
नध्यायेऽगलग्रहे इति । राहोरार्धांशगस्थ सूर्ये निरंशः । गलग्रहास्तु वक्ष्यंते ॥ त्रयोदशी चतुष्कं च सप्तम्या

दित्र्यं तथा। चतुर्थ्येकादिना। प्रोक्तान्यष्टावेते गलग्रहा इति। अनध्याये विशेषश्चोक्तो नंदिना निबंधकृत्॥
अनध्यायाश्च सर्वेषु करनध्याया त्यजेद्दिनि। व्रतारंभं विसर्गं च विविधारंभं न कारयेदिति। एतच्च प्रतिपदादिनि
त्यानध्यायपरं। न पुनर्नैमित्तिकेष्वपि तेषु प्रवर्तते नित्यानित्यसंयोगविरोधात्। गलग्रहापवादमाह स्मर
णार्जः॥ विनर्तुना वसंतेन कृष्णपक्षे गलग्रहे। उपनीतस्त्वनध्याये पुनः संस्कारमर्हतीति। अत्रानध्यायपदं नै
मित्तिकानध्यायेन नित्यानध्याये नैमित्तिकानध्यायापवादमाह वसिष्ठः॥ पौषे च वैशाखसितात्तृतीया मा
घस्य सप्तम्यथ फाल्गुनस्य। कृष्णे द्वितीयोपनये प्रशस्ताः प्रोक्ता भरद्वाजमुनींद्रमुख्यैरिति। तत्तृतीयादीनां नै
मित्तिकानध्यायत्वमनध्यायेषु वक्ष्यते। एतच्च पुनरुपनयनमरेच्चध्यायविषयोधस्या। कृष्णप्रतिपदादयः। ४०
प्रायश्चित्तनिमित्ते तु मेखलाबंधने मनाक्। निरूढगर्गोक्तिस्तु कर्कालादर्शे निर्णये वसिष्ठः॥ पापग्रहे द्वि

तेन प्रमोदे च गुरुशुक्रयोः। अस्तंगते वैधृत्यां विषनाडिष्वनक्षत्रे ते वविष्ट्यां चंडशी। तिसृष्वेतथा।
दिनक्षये व्यतीपाते सर्वदश्र पाडने। अन्यमासदिने राशौ महादोषसमन्विते। कालकर्णिकलौ वज्रे विष्टौ ने
परिघे तथा। शूले चैव वै धृतौ वैवर्कटके स्थूलकंदके। अरण्यां वैवरिक्तापांस वैसाता दिक्षितं। उक्तादन्यत्र
संयोगे वंद्यगं ज्ञाति गंडपाः। उडुप स्फुरण काले च वर्जयेदुपनायने। पापग्रहाश्चादयः। मौर्घमलः। तत्त्वं तत
संधिप्रतिपच्च। मासांते मासमंधिप्रतिपच्च। तिथ्यंते तत्संधिषु। विषनाडिषु ज्योतिशास्त्रप्रसिद्धासु तिथि
वारलग्नासु। केचित्तु निर्मूलं त्वविषघटिकानां मन्यं तत्तन्नक्षत्रोता स्तंभ्रंश्यः। विवादश्चेद्दावने तु योगसंधिल
ग्नसंध्यस्ते र पि निषिद्धे विशेषश्चोक्तः। नक्षत्रयोगतिथिसंधिषु नाडिकैकातिथ्यष्टाविंशति पलैः समंदितो नप
त्र। कर्कलिमि। ननु संधिषु दिकपलानि त्याज्यानि शेषविवरेषु तु पंचपंचेति ननु लग्नं त्वलिद्धेविकः।

कर्कालिमीनाख्यास्तास्तनवध्येविग्रहः।शेषाण्युक्तकर्कादित्रयातिरिक्तानिमेषादीनिनवलग्नानि।
तेषांविवराणिसंधयइत्यर्थः।तिथयःपंचदशाद्यादिकदशाहर्वनिक्षत्रांतेउत्तरनक्षत्रादौचपंचदशपलयुक्ते
कानाडीसाज्येत्युनयत्रेत्यस्यार्थः।एवंपागष्टपलयुक्तातिथ्यादिर्विंशतिपलयुता।कर्कादित्रयत्रयेदशप
लयुता।तद्दितरेषुत्रयपंचपलयुतेति।वार्हस्पत्येतुवर्षसंधिरपिनिषेधेविशेषश्चोक्तः।घटिकाद्वयमत्रांते
मासांतेवदिनत्रयं।वर्षांतेवर्जयेत्सर्वग्रहणेदिनसप्तकमिति॥ अत्रवर्षसौरं॥ सौरत्वांतेत्यजेत्संक्रांतौडु
नवकंत्यजेत्।मावनांतेतिमंसार्ज्यनात्क्षत्रेपौसमनात्रदमिनिस्मृतिदर्पणस्मृतेः।अंतिममित्यत्रापिव्यहमि
त्यन्वेति।याकांक्षत्वादपोम्स नेरवतौ।षडशीतिमुखेकन्यामीनधनुर्मिथुनसंक्रमेषु।एतच्चसंक्रांतिमात्रो ४१
पलक्षणार्थं।अतएव वसिष्ठः॥ विषुवतोस्यनपादित्रवंदरिपदेषडशीतिमुखेपिव।सर्वतोपिपरतो

पिसंक्रमात्त्राज्यिकाश्चरवत्तुषोडशात्यजेदिति।अयनेमकरकर्कसंक्रांतौ।विषुवत्तुलामेषौ।आसुचत
स्रषुदिनत्रयंत्याज्यं।हरिपदःवृषसिंहवृश्चिककुंभसंक्रांतयः।षडशीतिमुखमित्युक्तार्थे।तासुचषष्टु
षोडशनाड्यस्त्याज्या।पादमामान्यतःषोडशाक्तिनारदीये।त्याज्याःसूर्यस्यसंक्रांतेःसर्वतःपरतस्त
दा।विवाहादिषुकार्येषुनाड्यःषोडशषोडशांतिमाधुक्ताष्टसंक्रांतिविषया।अयनविषुवतोरप्यत्या
वश्यककार्यपराश।ग्रहस्यग्रहणपाडनंतुद्वयत्राहोरात्रेतद्वर्ज्यमित्यर्थः।कन्यमासोमलमासःस्त्र
न्यदिनंतिथिः॥ तात्रावशिष्टे॥ ग्रहस्यग्रहणपाडनंपुढलयत्राहोरात्रेतद्वर्ज्यमिश्चसप्तमीनवमी।चैत्रे
पक्षयोरुभयोरपि।माघवेद्वादशीत्याज्यापक्षयोरुभयोदशीत्याज्यामितेतक्षेचतुर्दशी।आषाढेक्षप
क्षयष्ठीशुक्लेद्वसप्तमी॥ द्वितीयाचतृतीयावश्रावणेसितपक्षयोः।प्रथमावद्वितीयावनस्येनासि

निर्दिने। दशम्येकादशी निंद्यामासौ शौचशुक्लकृष्णयोः। ऊर्जे चतुर्दशी शुक्ले तस्य पक्षे तु पंचमी। सप्तमी वाष्टमी सौ
म्यपक्षयोरुभयोरपि। पौषे पक्षद्वये दैव चतुर्थी पंचमी तथा। माघे तु पंचमी षष्ठी कृष्णशुक्ले यथाक्रमं। तृती
या च चतुर्थी च फाल्गुने सितकृष्णयोः। तिथयो मासमुख्याख्या वंशविन्नविनाशनाः। आसु श्राद्धं प्रकुर्वीत
नैव मंगलमाचरेदिति। न चास्य इत्यत्रापि सितकृष्णयोरिति श्रूयते। पौष्यो मार्गशीर्षः। तथा विद्यादि। पाणि
ग्राह्ये यद्गृणं ज्यान्तं स वर्ज्यं इत्यर्थः। ग्रहणादूर्ध्वं दिनान्यपि वर्ज्यानीत्याह। गिरा॥ सर्वग्रासे तु सप्ताहमर्धग्रा
से दिनत्रयं। त्रिचतुर्थोऽगुलतो ग्रासे दिनमेकं तु वर्जयेदिति। एतच्च सप्ताहादिवर्जनं ग्रहणाद्ध्वं ज्ञेयं चंद्रसू
र्योपरागे श्रुत्वा दुर्गोत्तरं गर्भेन न देव। सप्ताहमन्तं पश्चात् कृतं त्रयहसन्धस कामिति गर्गोक्तिः॥ अत्रोक्तं ४२
ग्रहणसामान्येन सप्ताहवर्जनं गिरिसोक्तं सर्वग्रासविषयत्वेनोपसंह्रियते। विवाहपटले तु भाकुपश्चा

द्भ्रमप्रदिनवर्जनमुक्तं। तत्रैव चंद्रस्य ग्रह्यात् ऊर्ध्वं प्राक्पश्चाद्दिनसप्तकं। दशाहादिवर्जनमादर्वेज्ञेश्वराः। ग्रहेर्
वीन्द्रोरवनिप्रकंपे केतूद्गमे ल्कापतनादिदोषे। व्रते दशाहानि वदंति तज्ज्ञास्त्रयोदशाहानि वदंति चेविदि
त्यपर्युज्योतिर्निर्विधः पंचदिनातिवसिष्ठस्त्रिदिनं गर्गस्तिकौशिकस्त्वेकाय वनावार्यस्य मत पच्चमुहूर्तान्वि
दधातिराकुरित्यल्पाल्पदिनवर्जनमु। कंनदावश्यककार्यविषयं। अस्तास्तयस्तोदयपोन्वा दसुतः। अस्ता
स्तो त्रिदिनं सर्वं पश्चाद्वस्तोदये तथा। एकस्यामेत्रि दिनं निःशेषमस्तमस्तं भवति। निःशेषमर्वग्रासे। उत्पत्त
स्नाहादिवर्जनं दिनरात्र्यर्धयोर्जाततस्तु पूर्वचंद्रोपरागविषयं। तथा च कश्यपः॥ अस्तोदये परादोषोग्रस्तो मे
र्वाकशशिनयोः ग्रहनिर्णयार्थंश्रे यंतलरवंडारवंड व्यवस्थयोरिति। तच्च हेमाद्रौ स्मरणाद्वादश्यादि कृता
तो वेधपृष्ठ इस्म न। एकादश्यादिकं मीरे चतुर्थ्यंतः प्रकीर्तितं इति तदपि ग्रस्तास्तोदयातिरिक्तविषयं।

सं०म०४२

कास्यपणायविरोधस्तत्रकालकर्णीकलिश्चेतियोगविशेषौ। वज्रादयोयोगाःप्रसिद्धाएव। कंटकस्तु सर्के
टंकाचपियोगविशेषौ। स्थूणकंटकइत्यपि क्वचित्पठंति अस्यतुनंगःप्रतीतिः। विवादप्रकरणउक्तोऽद्
भुतास्यःउत्पातात्मकस्त्रिविधः दिव्यभौमांतरिक्षाः। दिव्यःकेत्वादिः। आंतरिक्षोगंधर्वनगरादिः। भौमोभूमिकं
पादिः। तत्रकेतौवर्ज्यदिनान्याहव्यवहारचंद्रोदये। केतोरस्तदिनाद्ध्रुवंसप्ताहानिपरित्यजेत्। पावकेतुरुप
स्तावद्यज्ञक्रियासमयो न वेदितिएतच्चब्रह्मपुराणेधूमकेतुपरंतथाच। ज्योतिर्निबंधे। केतोरस्तदिनाद्ध्रुवंसप्त
रात्राणिवर्जयेत्। ब्रह्मपुराणेऽमेवर्ज्यंचनंपात्रांचमंगलमितिग्रहणप्रसंगेतुचंद्रेश्वरेणचभौमांतरिक्षदि
व्यभूकंपोल्कापतनकेतुधूमाधनरण्येनदशाहत्रयोदशाहानिनिषिद्धानि। नारदस्तुमासमान्यतउत्पात ४२
मात्रेसप्तदिनानिनिषेधः। उत्पातग्रहणाद्ध्रुवंसप्ताहंनिखिलस्तुनेश्यति। वर्ज्यमिति शेषः। अत्रकेतौपावद्द

ग्रंनतुध्रुवंसप्ताहादिनिषिद्धं चंद्रेश्वरवचनात् केत्वतिरिक्तोत्पातेतुदृष्टादेवसप्ताहादिनिषिद्धं। नारदवच
नात्। सगतिकागतिककार्यविषयंवान्यस्तुनाधिकदिननिषेधनंउक्तोद्धिदिनादन्येन। विहिते तत्कालेग्रहणमेवो
गोपस्यतादृशेचंद्रेवर्ज्यंउदुपस्त्रीणकालेत्वप्रपन्नइत्यपि। इतिवाभिप्रायः। भौमेतादोषःपत्नाछिद्रकृति
पिनिषेधउक्तोयेचावमतिथित्रिकस्पृक्तिष्यमदिननिषेधउक्तोमहाथनुसंधेयाः। तत्रमात्रविषय
च्चात्रेषामितिदृष्टव्यःकालादिकालमाह मदनः। सर्वदिक्षोभ्युदयास्तिमुखंयस्याउपनायनं। मध्यमतल्पेनधमंप्रोक्त
मपराह्णेविगर्हितमिति। अत्रत्रेधाविभागाभ्ययणेनपूर्वाह्णादिःक्षेयः। तथाचकौद। ऊर्ध्वंस्पर्शपादेपात्प्रोक्तं
मुहूर्तानांतुपंचकं। पूर्वाह्णःप्रथमःप्रोक्तोमध्याह्नस्ततःपरं। अपराह्णस्ततःप्रोक्तोमुहूर्तानांतुपंचकमि
ति। अत्रापराह्णेतुगर्हितमित्यपूर्वोपनयनविषयंपुनरुपनयनेतुनत्रनदोषः। निमित्तानंतरनैमित्तिक

स्यावश्यानुष्ठेयत्वात्॥ अत एवासमर्थेतो॥ अपराह्णे वापनं। तत्पुनः संस्कारमर्हति ॥ति। अतश्च प्रदोषे निःस्यनस्थम
पमंदेन स्वगत्यये। मधुविनोपनं। तत्क पुनः संस्कारमर्हती ॥ति। रेवमेनेनापराह्णः प्रदोषरात्र्योर्निषिद्धस्तु पुनरु
पनयन विषय एव॥ अपराह्णनिषेधस्तु कैमुतिकन्यायात्। इद्वेपिनपनस्य तयोरप्राप्तेः॥ प्रसक्तिश्च पूर्वेकल्वा यनि
षेधस्य क्वचित्सु प्रदोषपदेन तन्मात्रपरं किंतु पद्दिनमोभाव। तद्दिनपरमतोप्यपनयनस्यापि तत्प्राप्तिमेन
वाक्यस्य एव तन्निषेधस्तुक्तं। तथापित्रा॥ त्वयाह्नि सर्वस्मिन्नेव वर्ज्यमित्यप्युक्तं तत्रैव। तत्रि मूलमिति
वृद्धाः। पक्षच्छिद्रां च रिक्तां पित्रतिथिमपराह्णापरा॥ स्मु प्रशस्ता इति स्मृनमात्र विषयत्वेन समंतप्रकरण
प्रयोगपारिजातकारलिखितं वाक्यं मूलमिति ममभाति॥ अथ वाराः॥ ॥नारदः॥ आचार्य सौम्यकाव्यानां
वाराः शस्ताः शशिनयोः ॥मध्यमफलो प्रकावितरौ निदितौ व्रते। इनः सूर्यः। आचार्य सौम्यकाव्यानां

वाराः शस्ताः शशिनयोः। वारौ मध्यफलौ प्रक्का वितरौ निंदितौ व्रते। इनः सूर्यः। इतरौ भौमशनी॥ निंदितौ निषि
द्धौ। क्वचित्तु समनिषेधापवादमाह ॥स एव॥ शाखाधिपतिवारश्च शाखाधिपबलं शिशोः॥ शाखाधिपति
ग्रंवहुलं तेचिलयं व्रते। ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपः सितः। सामवेदाधिपो भौमः सौम्यसौरौ त्वथर्व
ण इति ॥सो रिः शनिः॥ ॥बृहस्पतिरपि॥ बह्वृचानां गुरोर्वारो यजुर्वेदविदां कवेः। सामगानां धरासूनोरथर्वविदु
षां बुधे इति। अत्र विधिर्मध्यमत्वापवादार्थः। वर्णनीवारं प्रवक्ष्यामि महार्णवे। ब्राह्मणस्य गुरुः प्रोक्तो
नृपस्य ज्योतिषांपतिः। बुधो वैश्यस्य शूद्रस्य सुरवैरी ततः स्मृतिरिति। शूद्रस्येतु विधिरुपनयनस्थाने
पवस्त्रग्रहण विषयस्तु समानत्र विशेषः। क्वचित्तु धर्मो सौमि निषेधानि ॥नारदः॥ वारो मंदार्कयोर्वर्ज्यो निसिव्रज्यो
निशापते॥ अत्र गतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मनां ॥ति। द्विजन्मोपनयनं। नारदीये निंदितावारदोषा

येऽर्कसूर्यवारादिषु क्रमात्। अपि सर्वगुणोपेता स्त्री वर्ज्याः सर्वमंगले। वारदोषाच्च अर्धयामकुलिकका
लवेलायमघंटकंटकाख्याः। विशेषो दैवज्ञमनोहरे। भवनवतिपमघंटा कंटकः कालवेलाकुलिकः
लिविरुद्धलसमाद्दीनिषिद्धमिति। अर्धयामस्त्विसर्वैरेत्याज्यः विशेषानुक्तेः। यत्तु संग्रहे। अर्धप्रहरका
रौम्नुमध्येनुयमघंटके। कुलिकेऽपि विवर्ज्यस्मुन्निसो दृष्टकनाडिकेति। अर्धयामादावल्पमेव त्याज्यमिति
केनचिदुक्तं यत्त्वावश्यककार्यविषयं वर्ज्यत्वं चैषामादिनमध्य एव न रात्रौ। नवारदोषाः प्रभवंति रात्रौ विशेषतः
निधनेऽप्रहरार्धे चेति। मर्त्यं यमघंटके। कुलिके सर्वनाशः स्यात्। अत्रावेतेनदोषदा इति वासिष्ठात्॥ अथ न
क्षत्राणि। ज्योतिःशास्त्रे। हस्तत्रयपुष्यधनिष्ठायाश्रवणोत्था। श्विनीम्यादिति विष्णुनेषु [illegible] तिथौ चंद्रबलेन ४५
शुक्रे कार्यो द्विजानां व्रतबंधमोक्षौ। पौष्णे च रैते। सौम्ये मृगे। अदितिः पुनर्वसुः। विष्णुः श्रवणः। अत्रै

तानि दशोपनयनसमावर्तनयोः साधारणान्युक्तानि॥ नारद अश्वयनपर्येनेन मात्रे [illegible] श्रवणः।
अत्रैतानि दशोपनयनसमावर्तनयोः साधारणान्युक्तानि॥ नारदः तिदशान्यानि षडुक्ति वर्षोडशात
मान्याह। अष्टान्यर्कत्रयांत्येऽप्यचंद्रादित्युत्तरास्तथा। विष्णुत्रयाश्विमित्राद्भुयातिनान्युपनायनेऽइति।
अर्केऽत्र हस्तचित्रास्वात्य। अंत्यरेवती। इज्य पुष्य। चंद्रो मृगशिरः। विष्णुत्रयं श्रवणादित्रयं। मित्रम
नुराधा। अहर्बुध्न्यो निर्नरोहिणी॥ स्पष्टमन्यत्। बृहस्पतिस्तु करोति पुत्रारात्रयं हस्तश्चित्रानुराधाधनिष्ठा
मृगः पुनर्वसुरिति दश [illegible] निषकश्रवणं पुष्य [illegible] उत्तराषाढ [illegible] अश्विनी रेवती तिस
मध्यमान्यन्यानि उदग्वा वर्ज्यानीत्याह [illegible] कृत्तिकानरणी मूलज्येष्ठा [illegible] विशाखयोः हर्वी
त्रयेवत्रापर्क्षे न कुर्यादुपनायनमिति। पुनर्वसुनिषेधमाह राजमार्तंडः। चंद्रतारानुकूले पुष्यदावे

पुंस्तु नेष्वपि। पुनर्वयोर्गतो विप्रः पुनः संस्कारमर्हति। इति स्मृत्यंतरेपि। अदृष्टा इमसेमा पित्र्य भ्रत्त्वमधि
गच्छति। उत्तरार्धं तु लैव। अयं च निषेधो ब्राह्मणस्य। विप्रग्रहणाल्लयहेतुके चित्। पुनःसंस्कारः पुनरु
पनयनं विप्रस्य पुनर्वसावित्यर्थे निपुनः पुनर्वसु निषेधो यमित्याहुः॥ तत्र॥ ज्ञतपदानन्वपात आद्यपदघोर
वधितेनित्यपाद्वतिपरमत्युरव। पुनर्वसु विप्रग्रहणेपि न तन्मात्रपरो निषेधः किं तु उक्तसामवेदि विप्रपर इति। अतए
व वेदभेदादनुव्यवस्थापके ज्योतिर्निबंधे तयो पुनर्वस्वोरस्य ग्रहणं। मूलेन हस्तत्रये। मा पौष्णे वह्निवर्त्रियेतथा। ऋग्वे
दाथर्वपिनां कार्यमेखलाबंधनं बुधैः। पुष्ये पुनर्वसौ पौष्णे हस्ते मैत्रे च वारुणे। ध्रुवेषु च यशस्य स्याद्यजुषां मौंजि
बंधनं। पुष्याश्विमवहस्ताश्विनिश्रविकर्णोत्तरात्रये। प्रशस्तमेखलाबंधो बह्वृचां साम गायिनां। मृगमैत्राश्विनीहस्त ४६
रेवत्यदितिवासवे। अथर्ववेदिनां शस्ता नगणोयं व्रतार्पणे इति। ध्रुवाणि रोहिण्युत्तरात्रयं च॥ नृसिंहः॥ षोडश

वह्निजः कुष्ठहीनो वैवैष्णवस्तथा। वासवहेमिव एश्विवारुणे कुंडगोलकौ अनुसवर्णमात्रोपलक्षणार्थौ कुंडगोलकाविति।
॥नारदः॥ जन्ममदशामंक मर्मसंघातर्क्षविषोडशं। अष्टादशं सामुदायं त्रयोविंशं विनाशनं। मानसं पंचविंशाख्यं
तावरेष्वनमेष्वपिति। एवं विहितनक्षत्राणामपि जन्मादिसंबंधनिमित्तोयं निषेधः। अयं च हपपदाद्वौलादिसाधर
ण॥ वासिष्ठे तु जन्मनक्षत्रस्य विधिरप्युक्तो नास्य विकल्पः॥ भरद्व॥ सप्तपंचमववाष्टसप्तविंशाति नेष्व च। वैना
शिके च जन्मऋक्षे नष्टे नेष्टपुनायनं। त्रिजन्मर्क्षं जन्मर्क्षं नतः एवं तु तत्त्रं च सप्तविंशस्य ग्रहणोक्तिः एवं नत्रिषेधविषय
विशेषणतक्तो विधिरतः। जन्मर्क्षस्य सुतु नक्षत्रसप्तविंशातिमं भवेत्। सर्वकर्मविनाशः स्यात्तद्वाव्यपगतोपदिष्टावि
त्त्रिषेधापवादोप्युक्तस्तत्रैव सप्तविंशातिनक्षत्रमेकराशिसमन्वितं। सर्वेषु शुभनक्षत्रं प्रोक्तं विवाहोपनयादिषु
॥नारदः॥ ग्रहणोत्पातनं सातेनेऽध्ययनं गलेष्वृक्षत्रयं॥ गुरुः॥ सर्वगामेतु षट्मासान्त्रिन्मासांश्चदलग्रहे।

अपादयद्गुणेधिन्यं मासमेकं विवर्जयेत्॥ वसिष्ठः॥ अस्तोदये वा धर्ममनिष्टमाहैर्यस्तात्तमानेप्युत्तमामपञ्च
कमिति। अथ गुरुशुक्रास्तादि॥ बृहस्पतिः॥ भृगावांगिरसे मूढे कर्तव्यं नोपनायनं मौंधमस्तः। ज्योतिःसारसाग
रे। बाले शुक्रे वृद्धे शुक्रे वृद्धे जीवे न च्छेजीवे। बालजीवे जीवे वर्षे सिंहस्थे सिंहादित्ये जीवादित्ये। जीवादित्ये गुर्वादित्यः॥ त
दाह शौनकः॥ एकराशिगतौ स्यातां सूर्यजीवौ स्यातां पदा पुनः॥ व्रतबंधविवाहादिशुभकर्माखिलं त्यजेत्। वाल्यादौ
दिवससंख्यामाह गर्गः॥ शुक्रो गुरुःप्राक्परतश्चबालो विंध्येदशा वंतिषु सप्तरात्रं। वंगेषु हूणेषु च षट्च पंचशे
षेषु देशेषु त्र्यहं वदंति। ज्योतिःसारसंग्रहे देवीपुराणे॥ यथा सिंहस्थितेजीवेतथैव मकरस्थिते। देवागारतडा
गादिव्रतोद्यापनगृहाणि च। विवाहं नागमहान्नयकरं न चेत्। लक्ष्मः॥ नाव स्थेवक्रसंस्थेप्यतिचरणगतेवालवृद्धा
स्तगे संन्यासोदेवयात्रा व्रतनियमविधिः कर्णवेधश्च दीक्षा मौंजीबंधश्च चूडा परिणयनविधिर्वास्तु देवप्रतिष्ठा
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते वा नाव स्थो मकरस्थः। एतदपवादमाह मत्स्यः॥ नर्मदापूर्व
भागे तु यावद् गोदावरी दक्षिणे। गंडक्याः पश्चिमे नागेमकरस्थो न दोषभाक्। अतिचारोल्लुप्तसंवत्सरापर नाम्ना।
तदपवादमाह गुरुः॥ वृषे मेषे च षे कुंभे यदि नातिचरेद्गुरुः। नतत्र कालजलोपः स्यादित्याहुर्भगवान् यमः॥ दे
शतोप्यस्यापवादः स्मर्यते। लुप्ताब्दहोषो विमतेमध्यसोमोद्भवाया गुरुनिम्नगायाः इति॥ वसिष्ठः॥ अतिचारग
ते जीवे वर्जयेत्तदनंतरं। व्रतोद्वाहादिकार्येषु अष्टाविंशतिवासरान्। राजमार्तंडः। वक्रातिचारगे जीवे वर्जयेत्तदनं
तरं। व्रतोद्वाहादियामष्टाविंशतिवासरान्। सिंहस्थवृद्धस्य तावपि विशेषः स्मर्यते। सिंहस्थितं मघायां स्थं गुरुं प
त्नेन वर्जयेत्। अन्यत्र सिंहभागे तु विवाहादि विवर्जयेत्। देशतोपि निषेधस्य वस्तुमाह गालवः। सिंहस्थिते देवगु
रौ विवाहं नेच्छंति यात्रां यमुनातटेषु। कलिंगवंगे च यमागधे षु रोषः प्रयुक्तो न तथान्यदेशे॥ गौतमोपि॥ कं वा खचरु

धिष्ण्येविवाहंकुर्वन्निषात्रांव्रतबंधदाहं।गोदावरीचोत्तरतोहिमाद्रेर्गोदावरीदक्षिणतोनसोस्तीति॥अथसमा
नक्रियाविचारः॥बृहन्मनुः॥एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः।नसमानक्रियांकुर्यान्मातृभेदेविधीयते॥ना
रदः॥पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रये।नतयोर्व्रतमुद्वाहान्मंडनादपिमुंडनं॥वराहः॥विवाहस्त्वेकजातानां
षण्मासाभ्यंतरेयदि।असंशयंत्रिभिर्वर्षैस्तत्रैकाविधवाभवेत्॥वसिष्ठः॥नपुंविवाहोर्ध्वमृतुत्रयेपिविवाहकार्यंदु
हितुःप्रकुर्यात्।नमंडनाच्चापिहिमुंडनंचगोत्रैकतायांयदिनास्तिभेदः।गोत्रैकतायामितिविज्ञातमापिंडेष्टव्यमिति
प्रयोगपारिजाते।संहितादीपे।ऊर्ध्वंविवाहात्तनयस्यनैवकार्योविवाहोदुहितुःसमार्धं।अप्राप्यकन्यांश्वशुरालयंतु
वधूप्रवेशःस्वगृहंनचाहो।एकोदरप्रसूतयोर्द्वयोर्येसहोदरकन्यकेनसदृक्सुतोद्वाहोहात्षण्मासेनपितृक्रियेति॥कात्या ४८
यनः॥कुलेऋतुत्रयादर्वाक्मंडनान्नतुमुंडनं।प्रवेशान्निर्गमोनेष्टोनकुर्यान्मंगलत्रयं।कुर्वंतितुनपाःकेचिदन्य

स्मिन्वत्सरेलघु।लघुर्वागुरुर्वाकार्यमाप्तिनैमित्तिकंतुयत्।पुत्रोद्वाहात्प्रवेशोरुभाकन्योद्वाहात्कनिर्गमः।मुंडनंचौ
लमित्युक्तंव्रतोद्वाहौतुमंगलं।चौलंमुंडनमेवोक्तंवर्जयेद्वरणात्परं।मौंजीचोनयनंकार्यमितोमौंजीनमुंडनं।अ
भिन्नेवत्सरेपिस्यात्तदहःसुतभेदयेत।अन्येद्यपिविवाहादिनकुर्यादेकमंडपे।देशकालसंकटेसनिकटेसंनिकर्षदिका
रिकायां।ऊढ्वापुत्रीनपितावदध्यात्सुतस्यांतरस्योद्वहनंकदापि।यावच्चतुर्थंदिनमत्रवर्षेसमाप्यवान्योद्वहः।नविदध्या
त्स्मृतिरत्नावल्यां।भ्रातृयुगेस्वसृयुगेभ्रातृस्वसृयुगेतथा।एकस्मिन्मंडपेचैवनकुर्यान्मंगलद्वयं।कारिकायां।
स्वसृयुगेभ्रातृयुगेभ्रातृस्वसृयुगेतथा।नकुर्यान्मंगलंकिंचित्एकस्मिन्मंडपेहनि।सोदरविषयमेतत्।एकोदरप्रसूता
नामेकस्मिन्वत्सरेपुनः।विवाहंनैवकुर्वीतमंडनात्परिमुंडनमितिस्मृतेः।ज्योतिर्निबंधेपि।एकोदरयोर्द्वयोरेकदिनोद्व
हनेनवेतत्राज्ञा।नघंतरएकदिनेकेषांचित्संकटेवस्तुमितिसमानक्रियाविचारः।अथात्ररजोदोषेनिर्णयः।मेधाति

थि। चौले चव्रतबंधे च विवाहे यज्ञकर्मणि। नार्यरजस्वला यस्य प्राप्तस्यान शोभनं। तथा च ध्रुवरान्यतरयोर्ऊ
नलीवेद्रजस्वला॥ तस्याः शुद्धेः परं कार्यं मांगल्यं मनुरब्रवीत्॥ वृद्धमनु॥ विवाहव्रतचूडासु माता यदि रजस्वला।
तदा न तत्प्रकर्तव्यं मातृशुद्धेः परं पुनः॥ बृहस्पतिः॥ वैधव्यं चवि चारस्यादंडउत्वं व्रतबंधये॥ चूडायां चव्रिशो
मृत्युर्विघ्नं यात्राप्रवेशयोः॥ रजस्येन तत्। कपर्दिकारि। कार्या॥ सूतिकोदक्ययोः शुध्यैगोदधाद्धोमपूर्वकं। प्राप्तेकर्म
णि शुद्धिः स्यादितरस्मिन्न शुध्यति। स्वलानेत्तुमुहूर्तस्य रजोदोषे च मंगते। श्रियं समभ्यर्च्य तत्कुर्यात् पाणिग्रहणमं
गलं। हैमीं माषमितां पद्मां श्रीसूक्तविधिनायजेत्। भ्रष्टवंपाय मैं कृत्वा चाग्निषेकं समाचरेत्। मुहूर्तर्विताम
णौ। नांदीश्राद्धोत्तरं मातुः पुष्पे लग्नांतरं नवेत्। शांत्या चैलिं व्रतं पाणिग्रहः कार्यो न्ययानसत्। अयस्ततकादे ४९
शोतिः॥ सकटेसमनुप्राप्ते सूतके समुपागते। कूष्मांडी निर्ऋतिं कृत्वा गां च दद्यात् पस्विनीं॥ चूडोपनयनोद्वाहश्रा

तिष्ठादिकमाचरेत्। परैवसूतके प्राप्तिरैवान्युदपक्रिया। अनारब्धविशुध्यर्थं कूष्मांडैर्जुहुयाद्घृतं। गां दद्यात्संव
गव्याशीतत शुध्यनिसूतकी॥ ज्वरेगर्गः॥ ज्वरस्योत्पादनं यस्य तु नेतस्य न कारयेत्। दोषनिर्गमनान्पश्चात्स्वस्थः क
र्मसमाचरेत्॥ हर्म्यदाहे सूतेचैव विवाहं यः करोति च। न घोरं कविना शस्यान्मनुः स्वायंभुवोऽब्रवीत्। नांदीमुखे कृते पश्चा
त्प्रदाहो भवेद्यदि। पाणिग्रहे न कर्तव्यो नारी वैधव्यदा सदा। केचिदूर्ध्वं हस्तयस्य कस्यचिद्दारुणो ज्वरता वन्मंगल
कृत्यं च न कार्यं निश्चितं बुधैः॥ प्रयोगरत्ने॥ नांदीश्राद्धे कृते न पश्चादनध्याय पस्त्वकालिकः। मौंजीबंधं तदा कुर्याद्विदारं भंन
कारयेत्। आश्वलायनानां मुपनयनदिने वेदानारंभणा यजुः शाखिनां व तत्रतदारंभणा प्राप्तिविषयमिदं। नवकुच्प
रं। नेयं तु नांदीश्राद्धदिनात्प्रदूदिनमध्ये मुहूर्तांतरमत्वेले नैवश्राद्धे न तत्रोपनयनं कार्यं। न पुनः श्राद्धकरणं। तदुत्त
रं तु मुहूर्ते तु दिनश्राद्धं कृत्वोपनयने कार्यमिति नद्ध्यादा॥ तत्रापमाराय॥ त्रिषट्चौलोपनयने विवाहे द्वश्वासराः स्म

नेनोपनयनपर्णांगनांदीश्राद्धजन्याद्दर्वाक्षष्ठदिनपर्यंतमेवसन्नाबोधनेनतदुत्तरंतदाशौचस्युपगम्यतइति॥ अ
थप्रतिकूलविचारः॥ वृद्धवसिष्ठः॥ वरवध्वोःपितामातापितृव्यश्चसहोदराः॥ एतेषांप्रतिकूलेचेन्नरादिभ्रमदंबेव
त्॥ पितापितामहश्चैवमाताचैवपितामही॥ पितृव्यस्त्रीसुतोभ्राताभगिनीवाविवाहिता॥ एभिरेवविपन्नैश्चप्रतिकूलं
बुधैःस्मृतं॥ अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेत्॥ गार्ग्यः॥ वाग्दानानंतरंमातापिताभ्राताविपद्यते॥ विवाहोन
विकर्तव्यःस्ववंशहितमिच्छता॥ संकटेमध्यतिथिः॥ वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः॥ तदासंवत्सरादूर्ध्वंवि
वाहःशुभदोभवेत्॥ स्मृतिरत्नावल्यां॥ पितुरप्यूर्ध्वमिहाशौचेतदर्धंमातुरेवतु॥ मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्र ५०
योः॥ अन्येषांतुसपिंडानामाशौचंमाससंमितं॥ तदंतेशांतिकंकृत्वाततोलग्नंविधीयते॥ मुहूर्तचिंतामणौ॥ वधूवर
स्यापिकुलेत्रिपुरुषेनाशंप्रजेत्कश्चनतिश्चयोत्तरं॥ मासोत्तरंतत्रविवाहइष्यतेशौन्यायवास्तुकनिग्मिपरै॥

मेध्यतिथिर्निबंधे॥ पुरुषत्रयपर्यंतंप्रतिकूलंस्वगोत्रिणां॥ प्रदेशात्रिगमोनेष्टस्तथामुंडनमंडनं॥ प्रेतकर्मादिपनिर्व
र्त्यविरेन्नाभ्युदयक्रिया॥ आचतुर्थंततःपुंसिपंचमेशुभदंभवेत्॥ स्मृत्यंतरे॥ दीर्घरोगाभिभूतस्यप्रहादेशस्थितस्य
चउदासवर्तिनिश्चैवप्रतिकूलंनविद्यते॥ संकटेमनुप्राप्तेयाज्ञवल्क्येनयोगिना॥ शांतिरुक्तागणेशस्यकृत्वातांशुभ
मावरेनइति॥ अथोपनयः॥ प्रयोगपारिजाते॥ द्वादशविधपुत्रानुक्रम्यपठ्यते॥ एतेद्वादशपुत्रास्तुसंस्कार्याःसुबुद्धि
जातयइति॥ ब्रह्मांडपुराणे॥ ब्राह्मण्यांब्राह्मणाज्जातोब्राह्मणःसइतिस्मृतिः॥ तस्माच्चषंढबधिरकुब्जवामनपंगुषु॥ ज
डगद्गदरोगार्तेष्वक्रांगविकलांगिषु॥ मत्तोन्मत्तेषुमूकेषुशयनस्थेनिरिंद्रिये॥ ध्वस्तपुंस्त्वेषुचैतेषुसंस्कारास्यु
र्यथोचितम्॥ मत्तोन्मत्तौनसंस्कार्यौद्विकरोत्याचार्यएवतु॥ उपनेयाश्वविधिवदाचार्यस्वसमीपतः॥ आर्वालिकेवि
प्रचक्षते॥ कर्मस्वनधिकाराच्चपातित्यंनास्तिवैतयोः॥ तदपत्यंचसंस्कार्यमपरेत्वाहुरन्यथा॥ संस्कारमंत्रहोमा

शूद्रकरोत्यावाप्ये वलु। उपनेयाश्च विधिवदाचार्यैः स्वसमीपतः। आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा
चयेत्। कन्याश्चाकरणादन्यत्र सर्वं विप्रेण कारयेत्। एवमेव नद्धिकैर्जातौ संस्कार्यौ कुण्डगोलकौ। उपनयनं तत्सं
स्काराननुवृत्त्या परांके यमः। शूद्रेष्वेवं विधिः कार्यो विना मंत्रैर्न संशयः। न केनचित्समसृजच्छंदसां तं प्रजापतिः।
समसृजन् न सृष्टवानुपनीतवांश्च। तत्रैव ब्राह्मे विवाहमात्रसंस्कारं शूद्रोपि लभतां सदा। मात्रशब्दान्मंत्रव्यावृत्तिः
सर्वसंस्काराणां वा। तथा च विकल्पः। इत्युपनेयाः। अथोपनेतृक्रममाह वृद्धगार्ग्यः। पिता पितामहो भ्राता ज्ञातयो गो
त्रजाग्रजाः। उपायनेधिकारी स्यात्पूर्वाभावे परः परः। भ्राताऽपितुः पितेवायनपेलुत्रंतर नावेपितुः पिता। तदना
वेपितु भ्रातान दनावेतु सोदर इति प्रयोगरत्नादिलिखितवचनात्। ॥याज्ञवल्क्यः॥ असंस्कृतास्तु संस्का ५१
र्या भ्रातृभिः पूर्वसंस्कृतैरिति सितदमानावेच्चानुनिरितिव्यवस्थेयं। अथोपनेतुरुपनेयपोल्लाधिकारार्थ प्रायश्चि

त्तमाह वृद्धविष्णुः। न कुत्रयं चोपनेनात्र नलक्षुस्वबद्ध्वरेदिति। ॥प्रयोगपारिजाते स्मृत्यं॥ गर्भाद्यसंस्कृतस्यास्य
कर्तव्यं चोपनायनं। प्रायश्चित्तं तु सर्वेषां नोपनायनिकस्य तु। गौतमस्यानधिकारः स्यात्रोपनायनिकं विनेति। उपन
यनप्राग्जातिग्रन्थिच्छेदनादिसंस्काराणां तु मुख्यगौणकालातिक्रमे प्रायश्चित्तमात्रानुष्ठानं न पुनः संस्कारानुष्ठान
मपि। उपनयने तु नयविधकालातिक्रमेपि प्रायविधकालातिक्रमेपि प्रायश्चित्तानुष्ठानं सर्वमनुष्ठेयमेवनप्रा
यश्चित्तमात्रानुष्ठानमिति विवाक्यार्थ प्रायश्चित्तमाह ॥शौनकः॥ एतेष्वेकैकलोपे पिपादकृच्छ्रं समाचरेत्। चूड
यास्त्वर्धकृच्छ्रं स्यादापदि त्वेवमीरितं। अनापदि तु सर्वत्र द्विगुणं व्रतमाचरेत्। एतेष्वाधानादिषु ॥मदन॥ आरभ्या
धानमाचोलाकालेनातेतु कर्मणां। व्याहृत्याज्यं तु संस्कृत्य सकृत्वा कर्मयथाक्रमं। कार्यमिति शेषः। काले मुख्ये
न तु गौणे। तदतिक्रमे करणस्यैवेत्यक्तवान्यत्र कारिकायां। प्रायश्चित्ते तस्मात्पश्चाददतीतमपि कर्माद्य कार्यमित्ये

कष्वावायनिसंसेतु विपश्चित इति तदपि मुख्यातिक्रमपरं। अत एवमनुज्ञातकर्मादिसंस्काराश्च कालेन न
वंति चेत्त्वौलाद्वर्वाक्त्रकुर्वीत अग्न्यम्बिद्ध्यादनंतरं तत्त्वोपनयनं प्राकृतु व्रतोपि भवति नानुक्त एव यद
हृत्पैष्यन्माणवको भवति प्रागेवैनं तद्दन्तेजियंता तिगोमितोक्तेः। तच्चवर्णक्रमाद्भवति यमाह यम॥ यथोप
वावमिक्षादारा। क्रमशस्त्रयाणामुपनयनाहीति। शिथिलश्चोदनोयवाग्। घनी भूतं पय आमिक्षा। पय एव घ
नीभूतमामिक्षेत्यभिधीयत इत्युक्तेः। अथ परिधानाजिनान्यवस्त्रं॥ तत्राश्वलायनगृह्ये॥ अहतेन वाससा संवीतं
मैणेयेनवाजिनेन ब्राह्मणं रौरवेण क्षत्रियं माजेन वैश्यं यदि वासांसि वसीरन् रक्तानि वसीरन् काषायं ब्राह्मणो मांजि
ष्ठं क्षत्रियो हारिद्रं वैश्य। अत्र कृष्णाजिनमुक्तरीयं ब्राह्मणस्य रौरवराजन्यस्य गव्यं वस्त्राजिनं वा वैश्यस्येति वासिष्ठो ५२
क्तिनानामुत्तरीयत्वोक्तेस्तु वैकल्पिकतयाहतमप्युत्तरीयत्वेनैव विधीयते। एणी बिंदुरहिता स्मृता। रुरुर्बिंदुमान् स्मृत॥

अजश्छागः॥ अहतलक्षणमुक्तं प्रचेतसा। ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं। अहतं तद्विजानीयात् सर्वकर्म
सु पावनं वसिष्ठः। शुक्लमहतं वासो ब्राह्मणस्य कार्पासं मांजिष्ठं क्षौमं क्षत्रियस्य पीतं कौशेयं वैश्यस्येति। वस्त्राव
स्था॥ अथ मेखलावस्था॥ तत्राश्वलायनगृह्ये॥ तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्यावी वैश्यस्य। अ
थमेखलाव्यवस्था॥ तत्राश्वलायनगृह्ये॥ तेषां मेखला मौंजी ब्राह्मणस्य धनुर्ज्या क्षत्रियस्यावी वैश्यस्य। अविस्त्रणां पि
ण्डोमल्लता आवी॥ विशेषमाह मनुः॥ मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य
शणतांतवी॥ मुख्यालाभेऽनुकल्पमाह मनुः॥ मुंजालाभे तु कर्तव्याः कुशाश्मंतकबल्वजैरिति यमः। एतेषामप्यला
भे कुशाश्मंतकबल्वजैः। मेखला त्रिवृता कार्या ग्रंथिनैकेन वा त्रिवृत् मनुः॥ त्रिवृतां ग्रंथिनैकेन त्रिभिः पंचभिरेव वा॥
आश्वलायनाचार्योपि। त्रिवृता मेखला कार्या त्रिवारस्य समाहता। तत्र ग्रंथयस्त्रयः कार्याः पंच वा सप्त वा पुनः। अ

त्रयाशब्दनिर्देशाद्ग्रंथ्यानांनविप्रादिक्रमेणान्वयः॥ किंतुयथाकुलाचारंविकल्पः। सर्वमवरसंख्ययादृश्यते।
इतिमेखलाव्यवस्था॥ अथदंडव्यवस्था॥ आश्वलायनगृह्ये॥ तेषांदंडाः। पालाशोब्राह्मणस्यौदुंबरःक्षत्रियस्यबै
ल्वोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितःक्षत्रियस्यघ्राणसंमितोवैश्यस्यसर्वेवासर्वेषां। घ्राणेनासा॥ म
नुः॥ ब्राह्मणोबैल्वपालाशौक्षत्रियोवाटखादिरौ। पैप्पलौदुंबरौवैश्योदंडानर्हंतिधर्मतः। एतेषामप्यभावेतुसर्वेषां
सर्वयज्ञियाः॥ अत्रसत्यपिद्वंद्वनिर्देशेबैल्वःपालाशोवादंडइतिवसिष्ठेनविकल्पोक्तेरविवक्षितंसमादित्वं। दंडवि
षयेण्याह मनुः॥ ऋजवस्तेतुसर्वेस्युरव्रणाःसौम्यदर्शनाः॥ अनुद्वेगकरानृणांसत्वचोनाग्निदूषिताः॥ अव्रणाअ
छिद्राः॥ सौम्यदर्शनाअकंटकिनाद्याः॥ अनग्नीति अस्पृष्टाः। इतिदंडव्यवस्था। अथयज्ञोपवीतव्यवस्था॥ त ५२
त्रमनुः॥ कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत्। शणसूत्रमयंराज्ञोवैश्यस्याविकसौत्रिकं। त्रिवृदितित्रिगु

णितंत्रिगुणंकृत्वोर्ध्ववृतंदक्षिणावर्तितं। एतच्चोत्तरत्रापिसंबध्यतेविशेषः छंदोगपरिशिष्टे। त्रिवृदूर्ध्ववृतं
कार्यंतंतुत्रयमधोवृतं। त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यते। देवलोपिग्रामात्रिःक्रम्यसंख्यायषण्णवतं
गुलानुतत्र। तावत्त्रिगुणितंसूत्रंप्रक्षाल्याब्लिंगकैस्त्रिभिः सावित्र्यात्रिवृतंकुर्यात्रिवस्त्रंतुतद्भवेदिति अत्रचतु
रंगुलीषुषण्णवतिसंख्यावया चतुरशीत्यधिकत्रिशतांगुलकंसूत्रमुक्तं सर्वप्रकृतिवृत्तउक्तोपवीतालाभेयथा
संभवंगोवालादिग्राह्यमित्याह देवलः॥ कार्पासक्षौमगोवालशणवल्कतृणादिकं। सदासंभवितोधार्यमुपवीतं
द्विजातिभिः अत्रसदाग्रहणान्नित्यत्वं। यथाह मनुः॥ सदोपवीतिनाभाव्यंसदाबद्धशिखेनच। विशिखोव्युपवीतश्च
यत्करोतिनतत्कृतं अत्रबाधयपादेनपुरुषार्थतोक्रत्वर्थेणकत्वपत्तापि। कात्यायनः। पृष्ठदेशेचनाभ्यांचधृतं
यद्विंदतेकटिं। तद्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितं। मनुः। उपवीतंवटोरेकंद्वेतथेतरयोःस्मृते। एकमेवयती

नांम्यादितिशास्त्रस्यनिश्चयः।।यतीनांत्रिदंडिनां।।वसिष्ठःकालानोत्तरमेषविवाहात्प्रागपिहिस्यादस्नातकानांहि
ता।यस्यादंतर्वासिस्तथोत्तरं।एतच्चनित्यानिधाय।वकृष्णुकामन्त्रवर्णात्।।तदाहदेवः।।लवहूनिवापुषामन्ये
ति।तत्राविशेषप्रसंगेविशेषमाहकश्यपः।।त्रिशिवत्रारिपंवाष्टग्रहीणास्युर्दशापिवा।उत्तमाश्रमिणस्त्वेकंब्र
तिनस्त्वेकमेवहीति।कार्पासमुपवीतंविप्राणामाहदेवलः।।कार्पासमेकंसमादध्यात्कुविकेत्रविशोधितं।त्रिवृत्तंतुतथा
नार्यब्राह्मण्यास्तत्रकर्तृतं।स्मृतिसारेपि।छेदविताणोवास्यात।कन्ययानिर्मितंसूत्रंनाविधवाधावतिरथवास्वत्रं
रहोतवैसृवि।केशवंसर्गत्वाहदेवलः।।सूत्रंसलोमकंवेस्याल्लनः।लेत्वाविलोमकं।मार्विज्यारत्नतो।द्विर्मीवि
नामिन्तुह्रयेत्।विच्छिन्नंवाप्यधोयातंतुत्सृष्टानिर्मितमुत्सृजेत्।विशेषमाहमनुः।।मेखलामाजिनंदंडमुप ५४
वीतंकमंडलुं।अप्सुप्रास्यविनष्टानिगृह्णीतान्यानिमंत्रवदितिदण्डाजिनादी।अपकृष्यावलायतोपि।विधि

तामुप्रशस्तेयौछिन्नानप्सुविनिक्षिपेत्।छिन्नेषेतेषुउष्टेषुप्राकनान्यधारणात्स्यजेदिति।इत्युपनयनं।अथ
ब्रह्मचारिधर्माः।।तत्रस्मृत्यर्थसारे।।उपनयनादनंतरंत्रिरात्रंद्वादशरात्रंवर्षमेकंवाक्षारलवणाशयधःशा
यीब्रह्मचार्युपनव्रतंकुर्यादिद्यसावित्रीव्रतमुपाकरणंतमारण्यकव्रतानिचलयवेति।अक्षारमलवणंचा
अनातिलयोकः।क्षाराःस्मृताःसंनरे।तिलमुद्गादृतेचौधमस्थगोधूमकोद्रवौ।वीनकंदेवधान्यववणकंवनथैस
वांस्विन्नधान्यंमवर्णाकमेवक्षारगणःस्मृतइतिसंवर्तः।संध्यंमातःसनक्षत्रामुपासीतयथाविधि।आदि
त्येपश्चिमांसंध्यामर्धास्तमितभास्करां।निधनस्त्रवर्जिपंकुर्यादभुवाराससमाहितः।आसीतःपश्चिमांसंध्यां
जपंकुर्याद्दिसंडितः।अग्निकार्यंविकुर्वीतमेधावीतदनंतरं।ततोधीयीतवेदंतुवीक्षमाणोगुरोर्मुखं।मापं
मातस्त्वनिल्लेनब्रह्मचारीसमाहितः।निवेद्यगुरवेऽश्नीयात्प्राङ्मुखोवाग्यतःशुचिः।।मनुः।।नित्यंस्नात्वाशु

विः कुर्याद्देवर्षिपितृतर्पणं। देवताभ्यर्चनं चैव समिधेपासनमेव च। कारिकायां। उपाकरणपर्यंतं सावित्र्या ब्रह्म
यज्ञकृच्छ्रोपन। धनप्रदिने एव ह्यकृशारिवनिर्मथ्य तत्सायाह्ने यो मंथ्यस्तद्ये कार्यश्चान्येऽल्कसावं संध्यमात्रं त्र
ल्पयह्न्तर्ह्वत्रराह। प्रज्वलितसर्वैः कार्यं इति प्रयोगपारिजाते। ब्रह्म मथ्यांतदुपनयनदिने ह्यकशाखिविनिर्मथ्य तत्संध्यम
नकार्यं तत्कृतं तन्मतह्यंतालवरणैरेव ह्नतनिर्णयपरिचिष्टेप्यवस्थापितमिति तद्रूपं चैतस्मान्नविशेषमाद
दस्न॥ प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः॥ यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः॥ स्नानद्वयमप्याद गोभि
ल॥ सायं प्रातरुदकोपस्पर्शनमिति। त्रिषवणमप्याद। आश्वलायन॥ तदाज्ञयात्रिषवणं स्नायीत चमदग्निर्वि॥ वि
स्वापस्तौ। दंडवन्मज्जनं नाभ्युत्साधमानः स्नायादिति। नांगनैर्मल्यं कुर्यादित्यर्थः। पुराणांतरे। मेखलामजिनं ५५
दंडकुपवीतं वनित्पशः॥ कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत्। दर्भमुष्टिकमंडल्वोरपि धारणमुक्तं याम्ये।

याज्ञवल्क्य॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः। आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत्। दिर्तु
चास्या वरेण्नित्यमनोवाक्कायकर्मभिः॥ हारीत॥ अथोदकुंभकुशपुष्पसमित्फला हरणसंमार्जनोपलेपनांग
शुश्रूषाप्रवृत्तिमिच्छितति ध्वंतं शपानमास्नानं नक्यानुवर्तेत॥ बौधायन॥ सर्वत्राप्रतिसृष्टगुरुवाक्योन्यत्र
पातकादिति॥ मनु॥ न चैवाप्यासनं चास्य नियं मध्यागुरुसंनिधौ॥ एतदतिम एव॥ गोत्रोपयानप्रासादप्रस्त
रक्षुकरेषु च। आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥ मरव॥ गुरोर्यत्र परीवादो निंदा वापि प्रवर्तते। कर्णौ तत्र
पिधातव्यौ गंतव्यं वा ततोन्यतः। स्वयमपि परावादो निंदा वापि प्रवर्तते। कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोन्यतः।
स्वयमपि परिवादादि न कार्यं। न वेत्तु वरापरावादात्स्वावेन वतिनिंदक इति मेनैवोक्तत्वात्॥ मरव॥ नोदाहरेदस्य
नाम परोक्षमपि केवलं। न चैवास्यानुकुर्वीत गतिभाषितचेष्टितं। हारीत॥ नास्य निर्माल्यशयनासनछायाःपा

सं०म०५६

डकेवाञ्जाकामेदिति॥याज्ञवल्क्यः॥मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं।भास्करालोकनाश्लीलपरिवादा
दि वर्जयेत्।मधुक्षौद्रं न मद्यं।मांसं प्रोक्षितादपि।एतच्चव्याधिराहित्ये ज्ञेयं।व्याधौ तु गुरोरुच्छिष्टं तत्कृत्वा औषा
द।तथा च वसिष्ठः॥सवेद्याधीपीत कामं तु गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति।अंजनं तैलादिना यादिना
दृशोः।एतदपि वैद्योपदेशादृते।औषधस्याव्रतघ्नत्वात्॥तथा च बृहस्पतिः॥अष्टौ तान्यव्रतघ्नानि आपो मूलं फ
लं पयः।हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं।उच्छिष्टं गुरुव्यतिरिक्तस्य।उच्छिष्टमगुरोरभोज्यमिति वसिष्ठो
क्तेः॥पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यमित्यापस्तंबोक्तेश्च।कश्चिदेतदपवदति मनुः॥धर्मविप्रतिपत्तावभोज्य
मिति।स च धर्मपितस्य पितुरुच्छिष्टं न भोज्यमित्यर्थः।शुक्तं निष्ठुरवाक्यं।नात्तरसं।तस्यान्ते सेषुनिषेधस्तम्भुक्ता ५६
वाद इति गौतमोक्तेश्च।भास्करालोकनमुदयास्तमयवेलायामित्याचार्याः॥नेक्षेतोद्यंतमित्यादिमनूक्तेः।परमगुरव

स्त्रपुरुषार्थस्नानकव्रतविधेरध्ययनांगब्रह्मचारिधर्मविधेश्चैकवाक्यतानुपपत्तेः।सर्वदास्मर्तृग्रहणमत्र निषिद्धमि
त्याहुः॥अश्लीलमसभ्यभाषणं।गौतमः॥वर्जयेन्मधुमाल्यदिवास्वप्नयानोपानच्छत्रकामक्रोधलोभमोहवाद
वादनस्नानदंतधावनहर्षनृत्यगीतपरिवादभयानीति।वादः प्रलापः।वादनं वेण्वादिः।स्नानमुपभोगार्थं निमित्तं विहि
तत्वात्।भयं परस्य भयोत्पादनं।वर्जयेदित्यनुवृत्तौ मनुः॥द्यूतं च जनवादं च परिवादं तथानृतं।स्त्रीणां च प्रेक्षणालं
भमुपघातं परस्य च।अंजनवाहोदेशवादानाधिज्येषणं प्रश्नो वा।स्त्रीप्रेक्षणादौ विशेषमाह गौतमः॥प्रेक्षणालंभने मै
थुनाशंकायामिति।वर्जयेदित्यनुवृत्तौ मनुः॥गुरुदर्शनिकंठप्रावृतावसक्थिकापाश्रयणपादप्रसारणनि
ष्ठीवितविजृंभितहसितास्फोटनानीति।अत्रापि वर्जयेदित्यनुवर्तते।अपाश्रयणं कुड्यादिसंश्रयणं।अवस्फोटनं
भुजास्फालनादि॥हारीतः॥हयगजरथवृषभस्त्रद्वृषवाराहणमसनघर्वैरं तरणमसासादसविरुद्धानि वर्जयेत्॥विष्णुः॥

सं०म०५७

न्नलवर्णं ब्रह्मचारी वर्जयेदिति॥ मनु॥ नैनं ग्रामे ग्निनिः शो वेक्षुर्येनाम्युदियाक्कवित्। तं वेदभ्युदियात्सूर्यः शयानं
कामचारतः॥ निम्लो चेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनं। सुप्तो वाऽदिलो वास्यादथ वास्यात्किरवाज्जपः यथास्तुयेदि
यास्तौ यश्चेन भवतस्तथापतितव्यमित्याद्यार्थः। जपश्चात्रसाविच्याः सुप्तो वेति छेदागविषयं। अथ वाप्येत्तु
क्रमानवेतन विशेषमाहयम॥ खट्वासनं च शयनं वर्जयेद्दंतधावनं। स्वपेदेकः कुशाग्रेवनरेतः स्कंदयेत्क्वचित्।
कौर्म॥ नादर्शं वीक्षेत हसेनेति॥ गोभिल॥ अवलेखनं दंतप्रक्षालनं पादप्रक्षालनादि वर्जयेत्। अवलेखनं कं
कत्यादिना शिरसः॥ नूनं चर्वानिः प्रयोजनं। पादप्रक्षालनमुद्वर्तनं सर्वकं। पादेन वा पादस्य॥ आश्वलायन॥ वर्जये
त्साडकेछत्रं पानोपानाहरथादिकान्। नवासातनमयं स्वतालीकं विनयाद्भुत॥ तालीकं नालिकेरकमं उलुं। ५९
व्रतिनः श्वोभवलोकः आऽऽन्नं वन शस्यते। न नग्नरूपेक्षतां बलं मथमैथुनमेव च। वर्जयेत्स्नकनं लाजाजाजाः

पादिकान्व्रती॥ इति ब्रह्मचारिधर्माः॥ अथाग्निकार्यं॥ याज्ञवल्क्य॥ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि ततः
संध्योपासनोत्तरमित्यर्थः॥ आपस्तंबस्तु सायमेवाग्निकार्यमाहसायमेवाग्निरिंधनसेक इति॥ बौधायन॥ पुरस्तमय
सायं प्रागुदीचीं दिशं गत्वा हिमिन्नरण्यात्समिध आहरेत्पुष्कला ब्रह्मवर्चसकामश्चार्द्राः स्त्रायकाम अन्नकाम उभयकाम इति।
समिन्नियमो वायुपुराणे ह्युक्तो या शालाश्यः समिधः कार्या निवादिपर्णस्य दक्षामतः॥ नामरो ह्युक्ता स्वल्पास्तदभावे केवलसो॥
॥कात्यायन॥ तांगुष्ठादधिकाकार्यास्मिन्स्थूलतया क्वचित्। नवियुक्ता त्वचा चैव न सकीटा न पाटिता। प्रादेशान्नाधि
कानोना तथा न स्याद्विशाखिका॥ नातिपर्वा नातिपाण्डुर्हो मेषु च विदुः। आनना विशीर्णा विद्ला ह्रस्वा वक्राः ससुषिराः
कृशाः॥ दीर्घाः स्थूला वमनि धेवर्जनीयाः प्रयत्नतः॥ आश्वलायनगृह्ये॥ तस्मिन्समिधमादध्यात्तस्मै वै प्राजापत्यं
मंत्रेण इदं केऽग्नये समिधमाहार्षं बृहते जातवेदसे। तयात्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वाहेति। अनंतरं समुपदे

प्रजापतिर्देवतामंत्रप्र त्रिरितिमवस्या॥ आपस्तंबसूत्रेत्वयमेवमंत्रः किंचिदन्यथापठितोस्ति वैकाल्प्या॥ तत्र
ममग्नेवर्चो॥ नवमोयावाष्टायित्यः॥ इतरेदशाग्नेयाइति॥ कात्यायनसूत्रे॥ त्वग्नयेसमिधमित्यनेनकिंचिदन्यथापठितेनाह
तेन॥ एवानइत्याग्नेयमंत्रांतरमनुचितेनवातिग्र्य आकुलपठन्ना॥ इत्यग्निकार्यं॥ अथाभिवादनं॥ तत्रयाज्ञवल्क्य॥ त
तोभिवादयेद्वृद्धानसावहमितिब्रुवन्॥ ततोग्निकार्यानंतरं॥ असावित्यस्यस्थानेस्वंनामकीर्तयेत्॥ तत्रविशेषमाह मनु॥
अभिवादात्परंविप्रो ज्यायांसमभिवादयन्॥ असौनामाहमस्मीतिस्वंनामपरिकीर्तयेत्॥ नोच्चैर्ब्रूकीर्तयेदंतेस्वस्यनाम्नो
भिवादने अभिवाद्ययेदेवदत्तनामाहमस्मिभोइतिब्रूयादित्यर्थः॥ आपस्तंबः॥ दक्षिणंबाहुंश्रोत्रसमंप्रसार्यब्राह्मणोभि
वादयीतोरःसमंराजन्योमध्यसमंवैश्योनीचैःशूद्रइति॥ एतच्चहस्तद्वयेनकार्यं॥ अन्यथादोषश्रवणात्॥ तथाच विष्णु॥ जन्म ५८
प्रभृतियत्किंचिच्चेतसाधर्ममाचरेत्॥ धर्मंतन्निःफलंयातिएकहस्ताभिवादनात्॥ अत्रि॥ दक्षिणंपाणिमुद्धृत्यकाम

मभिवादयेत्॥ श्रोत्रियेतंचलिःकार्यःपादोपसंग्रहणंगुरोः॥ उपसंग्रहणंस्यचर्नि॥ तत्रप्रकारमाह मनु॥ व्यस्तहस्तपाणि
नाकार्यमुपसंग्रहणंगुरोः॥ सव्येनसव्यःस्प्रष्टव्योदक्षिणेनचदक्षिणः॥ पैठीनसिरपि॥ उत्तानाभ्यांपाणिभ्यामिति॥
बौधायनोपि॥ श्रोत्रेसंस्पृश्येति॥ प्रत्यभिवादनमाह मनु॥ आयुष्मान्भवसौम्येतिवाच्योविप्रोभिवादने॥ अकार
श्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः॥ सौम्यशब्दोभिवादयितृनामोपलक्षणार्थः॥ अकारइतिनामांतस्वरोपलक्षणा
र्थः॥ नाम्नामकारांतत्वनियमाभावात्॥ पूर्वमक्षरंव्यंजनंयस्यसपूर्वाक्षरः॥ ततश्चैवंप्रयोगः॥ आयुष्मान्भवदेवदत्ता
इति॥ व्यंजनांतस्यतुआयुष्मान्भवदेवदत्तशर्मा३न्इति॥ आपस्तंबप्रयोगश्चिंत्यः॥ आमंत्रितेब्राह्मणस्यपीतिनियमात्॥ प्रत्य
भिवादनाकरणेदोषो भविष्यपुराणे॥ अभिवादेकृतेयस्तु नकरोत्यभिवादनं॥ आशीर्वादंनकुरुतेसयातिनरकंध्रुवमि
ति॥ अभिवादनमत्रप्रत्यभिवादनं॥ आशिषमाह यम॥ स्वस्तीतिब्राह्मणेब्रूयादायुष्मानितिभूमिपः॥ वर्धतामिति

वैश्यस्यक्षत्रकुशलंस्वागतंवदेत् एतच्चसार्ववर्णिकं। ब्राह्मणःसर्ववर्णानांस्वस्तिकुर्यादितिश्रुतिरितिनविष्णुराणाल्।
एतच्चाभिवादनमधिकवयसामेवकार्यं ज्यायांसमभिवादयेदित्युक्तमनुवाक्यात् ॥यमवसिष्ठः॥ ऋत्विक्श्वशुरपितृव्य
मातुलानवरवयसः प्रत्युत्थायाभिवादयेदितितद्वानिमुख्येनवदन्यथालेकुर्वीततयाकुर्यादित्यभिप्रायं। अतएवापस्त
बः। कुशलमवरवयसंवयस्यंवापृच्छेदिति ॥मनुः॥ कुशलंब्राह्मणंपृच्छेत्क्षत्रबन्धुमनामयं। वैश्यंक्षेमंसमागम्यशूद्रमा
रोग्यमेवच। एवंवकनीयस्यभिवादनमात्रंज्यायसित्वभिवादनमितिशेषं। एतच्चब्राह्मणानांपरस्परं। तेषांक्षत्रियैःसस्त्वा
द ॥मनुः॥ ब्राह्मणंदशवर्षंतुशतवर्षंतुभूमिपं। पितापुत्रौविजानीयाद्ब्राह्मणस्तुतयोःपिता। अतोदशवर्षोपिब्रा
ह्मणःशतवर्षोपिक्षत्रियेणाभिवाद्यइत्याशयः। भूमिपशब्दःक्षत्रियादिपरः। तदाह ॥शातातपः॥ अभिवाद्योनमस्का ५९
र्यःशिरसावंद्यएवच। ब्राह्मणःक्षत्रियाद्यैस्तुश्रीकामैःसादरंसदा। नाभिवाद्यास्तुविप्रेणक्षत्रियाद्याःकथंचन। ब्रा

ह्मणेष्वपिकेचिदभिवादनापवादमाह ॥विष्णुः॥ समावसुवैबसवत्पिपञ्चोराजश्चदेभुव। नमस्कारंनकुर्वीब्राह्मणान्नाभि
वादयेत् ॥जमदग्निः॥ देवताप्रतिमांदृष्ट्वायतिंचैवत्रिदंडिनं। नमस्कारंनकुर्याच्चेदहोरात्रेणशुध्यतिच्छापस्तंबः। न
सोपानत्कोवेष्टितशिराअवहितपाणिःसाग्निपाणिः ॥मनुः॥ यानासनस्थश्चैवैनमवरूह्याभिवादयेत्। शेरवापि
नोदकुंभहस्तोभिवादयेन्नभैक्षंचरन्नपुष्पाज्यहस्तोनाशुचिर्नजपन्नदेवपितृकार्यंकुर्वन्नशयानइति। शातातपोप्य
नभिवाद्यानाह उदक्यांसूतिकांनारींभर्तृघ्नींगर्भघातिनीं। अभिवाद्यद्विजोमोहाद्दहोरात्रेणशुध्यति। पाखंडप
तितंव्रात्यंमहापातकिनंशठं। नास्तिकंचकृतघ्नंचनाभिवादेत्कथंचन। धावंतंचप्रमत्तंचमूत्रोच्चारकृतंतथा। भुंजान
माचमनार्हंनाभिवादेत्कथंचन। वमंतंजृंभमाणंचकुर्वंतंदंतधावनं। अभ्यक्तशिरसंचैवस्नास्यंतंनाभिवा
दयेत्। इत्यभिवादनप्रत्यभिवादनं। अथभिक्षाटनं। तत्रमनुः। प्रतिगृह्येप्सितंदंडमुपस्थायचभास्करं। प्रदक्षि

सं०म०६०

णंपरां साग्निं वरे द्वंद्वंपथाविधि॥गौतमः॥ आदिमध्यांतेषु नवछद्भं प्रयोज्यो वर्णानुक्रमेणेति॥व्यासः॥ ब्राह्मण
क्षत्रियविशां चरेत्पुनर्भैक्षमन्वहं॥ सजातीयगृहेष्वेव सार्ववर्णिकमेव वा॥ सार्ववर्णिकमापद्विषयं॥ तथाचनविष्णुपु
राणे॥ चातुर्वर्ण्यं चरेद्भैक्ष्यमलाभे कुरुनंदनेति॥ अत्यंतापद्यपि तत्रैव॥ सर्वेवापि चरेद्ग्रामं पूर्वोक्तानामसंभवे॥ अंत्य
वर्जं महाबाहो इत्याह भगवान्विष्णुः॥ सार्ववर्णिकं सर्ववर्णिक सर्वग्रामपक्षयोरपि द्विजपक्कान्नमिति धमाह॥ गिरा॥ आमं
वाद्द्वालान्माद्द्विजानेकरात्रकं॥ आमं स्यादिति संस्कारो धर्म्यं नैन्याः प्रतीच्छतां॥ तस्मादामं गृहीत्वा स्वं स्वकाद्यं गिरा ब्र
त्॥ एकविधयमवादमाह मनुः॥ गुरोः कुलेन भिक्षेत नज्ञातिकुलबंधुषु गुरोः॥ कुलेष्वन्यगृहे पूर्वं तेनैवोक्तं॥ असंभवेऽरा
णवादि अतएवैकान्नादित्वमित्यनिषेधमाह याज्ञवल्क्यः॥ ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि॥ एकमेवस्या ६०
निकं च आपदि चैव भिक्षुब्रह्मचारिण एकान्नाशनाभ्यनुज्ञा व्रतलोपब्राह्मणब्रह्मचारिणामाह नियोगेपि एकान्नाशनमप्य

भुंजीतेति मखः॥ ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्॥ भिक्षाशने विशेषमाह यमः॥ हस्तन्यस्तानु या भिक्षाल
वणं व्यंजनानि च॥ भुक्त्वा स्युर्विलीयातिरात्रात्स्वर्गं न गच्छति॥ मखः॥ आहारमात्रादधिकं न क्वचिद्भैक्षमाहरेत् यु
ज्यते स्तेयदोषेण कामतो ऽधिकमाहरन् इत्यनेनेह भिक्षमाहृत्य गुरवे निवेद्याश्नीयात्॥ तदाह गौतमः॥ निवेद्य गुरवेनुज्ञा
तो भुंजीत असन्निधौ तद्भार्यापुत्रसब्रह्मचारिसन्निधौ इति॥ अंतः श्रोत्रिया॥ मनुः॥ हज्योपेद्रानं नित्यमद्यादेनदकुत्स
यन्॥ दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनंद्याच्च सर्वशः॥ तस्यातनुमववनीयंप्रययेदितिविदिलंकार्यन
मनोत्तुनं॥ वसिष्ठः॥ अष्टोग्रासाः मुनेर्भक्षाः षोडशारण्यवासिनः॥ द्वात्रिंशत्तु गृहस्थस्यापरिमितं ब्रह्मचारिणः॥ अ
त्रपात्रनियममाह हारीतः॥ लौहे मृन्मये वा पात्रे भुंजीतेति॥ आपस्तंबः॥ भुक्त्वा स्वयममत्रं प्रक्षालयेत्॥ तियद्वनुकं
श्राद्धे व्रतमपीडयन्निति मधुमांसवर्जनं तत्राकामापन्नेमधुनि न दोष इत्याह वसिष्ठः॥ आकामापन्नं मधु वाज्जमनेयके

 रूपो द्विजन्मना। वेदेपि विशेषमाह वसिष्ठः। पारंपर्यगतो येषां वेदः सपरिबृंहणः। तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथैव॥

न दुष्यतीति॥ यमविष्णू॥ आद्यन्तलवणमधुक्षपर्युषितवर्जनमिति तदनभ्यर्हितविषयं। काममभ्यर्हितोऽम्। याज्ञ
नमस्य न दुष्यतीति मन्त्रोक्तेः। इति निषिद्धादनं। अथाध्ययनधर्माः। तत्र मनुः। तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो। परिबृंहणात् अंगानि शिक्षादीनि॥ शंख॥ अधीत्य शाखामात्मीयां परशाखां ततः प
ठेत्। अन्यथा दोषमाह स एव। स्वशाखां यः परित्यज्य पारक्यमधिगच्छति। स शूद्रवद्बहिः कार्यः सर्वकर्मसु साधुभिः॥ संव
र्तः॥ प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरं। सावित्रीं चानुवचनं ततो वेदान्तमारभेत्। तत इत्यादिवेदान्तमध्ययनं
तयत्र वेदं स्थितं तत्तदित्यर्थः। प्रणवोपि प्राणायामत्रयोर्ध्वं प्रयोज्य इत्याह मनुः। प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावि
तः। प्राणायामैस्त्रिभिः पूतस्तत ॐकारमर्हति। प्राक्कूलाः प्रागग्राः। पवित्रपाणित्वं तु गौतमेनोक्तं। प्राणोपस्पर्शनं दर्भैरि ६१
ति। प्राणाः शीर्षण्यानीन्द्रियच्छिद्राणि। दर्भपाणिः प्रणयमांतस्तव्यधनसमाधावपि वाच्यमित्याह मनुः। ब्रह्मणः प्रणवं कुर्या

दादावन्ते च सर्वदा। मध्याह गौतमः। प्राङ्मुखो दक्षिणतः शिष्य उदङ्मुखो वेति। मनुरपि। अध्येष्यमाणस्त्वाचान्तो य
थाशास्त्रमुदङ्मुखः। ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः। ब्रह्माञ्जलिमपि स एवाह संहत्य हस्तावध्येयं स हि
ब्रह्माञ्जलिः स्मृतः॥ संवर्तः॥ ततोऽधीयीत वेदं तु वीक्षमाणो गुरोर्मुखं। हस्तौ तु संहतौ कार्यौ जानुभ्यामुपरि स्थितौ।
पूर्वं तु ज्ञेयमध्ययनमन्यथा दोषमप्याह व्यासः॥ स्ववशं सर्वमेव यं वा पादेनापदमेव वा। गृह्णीयात् तं तु ज्ञातं परस्मात्
दत्तो द्विज। स ब्रह्मस्तेययुक्तो हि सो नरकं प्रतिपद्यते॥ मनु॥ नाविस्पष्टमधीयीत न शूद्रजनसंनिधौ। न निशान्ते परिश्रां
तो ब्रह्माधीत्य पुनः स्वपेत्॥ नारद॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितं। ऋग्यजुःसामभिर्दग्धो वियोनिमधिग
च्छति॥ व्यास॥ मेखलाजिनदण्डेन ब्रह्मचारिणः। वेदः कृत्स्नोऽधिगन्तव्यः सर्वदा न द्विजातिभिः। विद्याधि
गमोपायमाह नारद॥ अहरहः खिन्नमना ज्ञानैर्मोदित्यात्र रात्रौ ब्राह्मिकादिवा। सच्छमीप्सः प्रज्ञाव्यायामविद्याम

क्षिगच्छति। तथा विप्रहेतूनपि स एवाह। छत्रं पुस्तकं शुश्रूषा तातः कामं क्लिरेव च। स्त्रियः स्नानं च निद्रा च विप्रकरा
णि जद्। शुश्रूषां श्रोतुमिच्छा। तन्द्रा आलस्यं ॥कृष्णव्यासः॥ एकपादमप्यधीयानमार्गेणोक्तेन धर्मवित्। न ले
व चतुरो वेदान् तन्नायेन कदाचनेति। इत्यध्येतृधर्माः। अथाध्यापकधर्माः ॥याज्ञवल्क्यः॥ कृतज्ञाद्रोहिमेधावि
शुचिकल्यानसूयकाः। अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः॥ कल्पो नीरोगः ॥मनुः॥ धर्मार्थौ यत्र न स्यातां
शुश्रूषा चापि तद्विधा। न तत्र विद्या वक्तव्या शुभं बीजमिवोषरे। अध्यापनं सर्वरूपं समाह ॥यमः॥ यतनं तमालरु
स्यापदं तथा वनहव्यकं। आत्मज्ञाकृत्वा परिशिष्येभ्यः कुर्याद्ध्यापनं नरः ॥आपस्तंबः॥ शपानश्चाध्यापनं वर्जयेत्।
न चलस्यां शय्यायामध्यापयेत् स्यां शय्यायां तेति। मनुरप्यायं तयोः प्रेषा वाह। अध्येष्यमाणस्तु गुरुर्नित्यकालमत ६
न्द्रितः। अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत्। आरभेदध्यापनान्निवर्तेत ॥गौतमः॥ शिष्यशिष्टिरवधेन।

शक्तौ वेणुविदलाभ्यां तनुभ्यां। अन्येन घ्नन् राज्ञा शास्य इति शिष्टिः शासनं। अवधेन ताडनमशक्तौ सर्थः। तत्र
शिरसि न कार्यं। तदाह ॥मनुः॥ पृष्ठतस्तु शरीरस्य नोत्तमांगे कथंचन ॥वसिष्ठः॥ यो हि विद्यामधीत्यार्थितेन
संप्रदद्यात् स धर्मेण नाकस्यात्। एतच्चाध्यापनं ब्राह्मणेनैव कार्यं। तदाह ॥मनुः॥ अधीयीरंस्त्रयो वर्णाः स्वकर्म
स्था द्विजातयः। प्रब्रूयाद्ब्राह्मणस्त्वेषां नेतराविति निश्चयः। एतदनापदि। आपदि तु ॥गौतमः॥ आपत्कल्पो ब्रा
ह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा समाप्तेर्ब्राह्मणो गुरुरिति। विद्यादानस्य फलमाह ॥संवर्तः॥
विद्यादानेन महतीं ब्रह्मलोके महीयते। इत्यध्यापनं। अथानध्यायाः ॥तत्र हारीतः॥ प्रतिपत्सु चतुर्दश्यामष्ट
म्यां पर्वणोर्द्वयोः। श्वोऽनध्यायेऽद्यशर्वर्यां नाधीयीत कदाचन। स्कंदः स्मर्यते। चतुर्थ्याः पूर्वरात्रेषु ननाडीश्रुतस्तुनि।
नाध्येयं पूर्वरात्रे स्यात् सप्तमीत्रयोदशी। अहोरात्रास्तु रात्रेस्यान्नाध्येयं पूर्वरात्रके। मदारात्रिमध्यप्रहरद्वये

चानध्यायः॥ तथाहारीतः॥ प्रदोषपश्चिमौयामौ वेदाभ्यासेन तान्नयेत्। यामद्वयं शयानस्तु ब्रह्मभूयाय कल्प
ते। तथापि महानिशायां मध्यमयोर्यामयोर्द्वयोः। तथाह बौधायनः॥ मध्यमौ तु संध्यापोह्य नाधीयीत महानि
शि॥ मनुः॥ अष्टकासु त्वहोरात्रमृत्वंतासु च रात्रिषु। अष्टकाः पैदानसिनोक्ताः। पौषमन्नतपास्तेनवास्तिस्रो
ष्टकाः। मार्गशीर्षेष्टका अपीति॥ गौतमः॥ कार्तिकीफाल्गुन्याषाढीपौर्णमासीतिस्रोष्टकास्त्रिरात्रमिति। अत्रो
क्तपौर्णमासीष्वपि त्रिरात्रं। तथा तिस्रोष्टकाः सप्तम्यादयो नास्वपि त्रिरात्रमित्यर्थः। एवं मन्वादिष्वपि। तथा च
पुराणं। महानवम्यां द्वादश्यां भरण्यां च महाद्युते। तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः। माघमासस्य
सप्तम्यां रथाख्यायां विवर्जयेत्। महानवम्याश्विनशुक्लनवमी। महाद्वादशी कार्तिकशुक्लद्वादशी। महाभ
रण्यां प्रोष्ठपद्यां तथा। गंडदीपे। अयने विषुवे चैव शयने बोधने हरेः। अनध्यायस्तु कर्तव्यो मन्वादिषु युगा ६२

दिषु। पुराणेपि। अनध्यायं प्रकुर्वीत तथा वै सोपपदा तिथिः। सोपपदास्तु कालादर्शे। सिता ज्येष्ठे द्वितीया च आ
श्विने दशमी सिता। चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः। तथा कालादर्शे स्मृतिः। चातुर्मास्यद्वितीयासु
वेदाध्ययनं विवर्जयेत्। तथाह वृद्धगार्ग्यः॥ शुचौ ऊर्जे तपस्ये च या द्वितीया विधुक्षये। चातुर्मास्यद्वितीयास्ताः प्र
वदंति मनीषिणः। तथा कालादर्शे एवपदि स्वाध्याययदि नेनापं प्रातर्वास्तु कृतं द्वयमनध्यायतिथिर्यदा वानध्य
यनिमित्तं संध्यायस्तदापनध्ययः। तथा तत्रैवापराह्णस्त्रयोदश्यां स्याच्चतुर्दश्यां योगेनध्यायः। इति नित्यान
ध्यायाः॥ अथ नैमित्तिकानध्यायाः॥ तत्र वसिष्ठः॥ पर्दिहस्तामेचश्चरव्यांघ्रश्वेवतथैवेति। लोके गौतमः॥ पुर्वं
तेवासिनां वेदमध्येतः। पञ्चशारात्रपाकाशानाधीयीतार्धचन्द्रं॥ देवलः॥ अविगवयाजादिबाधनास्ति
कादौ त्रिमासमिति। अत्र व्याघ्रसहः। शार्दूलसंवत्सरोक्तेः॥ आपस्तंबः॥ श्रावण्यां पौर्णमास्यामध्ययनमु

पाञ्चसमासंप्रदोषेनाधीतेति॥ हेमाद्रौस्मृतिः॥ खरवराहोष्ट्रादिवंशालादिस्तिकोदक्याश्ववादेमाम
मिति। अत्रांतरागमनं सन्तुवर्तते॥ आश्वलायनः॥ द्वादशरात्रं महागुरुषु दशनाध्ययनं वर्जयेरन्निति॥ वृ
द्धमनुः॥ जननेदशरात्रं च शावे वसमुपस्थिते। नाधीयीत द्विजो नित्यं तावद्दाकालिकेषु च॥ हेमाद्रौस्मृतिः॥
यज्ञेशानुबध्यं तं ज्ञातिज्ञामाचार्याणां चेति॥ अघमर्षः॥ तिस्रो दाशास्त्रिरात्रमुपसंन्नस्यमं प्रसूतशतिपक्षेमम
रामे त्र्य नध्ययः। एकादशाहातिस्त्रउपमदः पंचमी प्रसूतशतिशतिपक्षे पंचरात्रमिति॥ मनुः॥ प्रतिगृह्य द्विजो विद्वा
नेकोद्दिष्टस्य केतनं। त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके। केतनं निमंत्रणं॥ वृद्धमनुः॥ अहं न कीर्तयेत्तत्त्र
लमपिंडीकरणेन या शरवोपि। उपाध्याये सज्जनि च स्मृते त्रिपि च मृते समब्रह्मचारिणि राकृ दर्शने श्राकभूकंपतने ६४
आचार्ये वमृते त्रिरात्रमिति शक्रध्वजपतनेनतउक्ष्योपपलक्ष्यते॥ याज्ञवल्क्यः॥ अहं मे तेष्वनध्ययः शि

ष्यर्त्विग्गुरुबंधुषु। गुरुं रत्राचार्योपि ध्यपो॥ मनुः॥ उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं॥ विरमेत्स्य च्छिणं
रात्रिं पक्षाप्येकमहर्निशं। अत्रय्यथाशत्लं पवर्षाभ्यवस्थांतरमाह मनुः॥ उत्सर्गे प्रथमाध्यपत्वन ध्यपस्त्रंह नवे
न। ध्मरणाध्ययनादौ तु पक्षिणोदिनमेव वा॥ यमः॥ शक्रध्वजनिपाते च उल्कापाते तथैव च। अनध्ययस्त्रिरात्रं
तु भूमिकंपे तथैव च। इदं चोल्काविद्युतो सादित्याविषयं। अत एव वसिष्ठः॥ उल्काविद्युत्समासे त्रिरात्रमिति॥ आ
पस्तंबः॥ विद्युज्जनपिन्दु हृष्टिस्वापतौपिच मंनियते पुरुष्य दमनध्यायोयावद्भूमिर्बुदके से के। अपतविकाले गार्ग्यः॥
अनुराधर्ष्मारभ्यपोडशर्क्षनुनाम्कर। पावत्प्रवर्तनं तावदकालं मुनयो विदुः॥ अतिवर्षे त्रिरात्रं स्यादल्पव
र्षे तु वासरः॥ पौत्रानसि॥ एकादशाहं तुस्कारात्वाविद्युः धनु हृष्टा वज्रयानना त्रिरात्रं संध्यस्तानिते करकापतने
वेन्नियमः। मर्दस्यनकुलस्याथश्वजमार्जारयोस्तथा। मूषकस्य तथोष्ट्रस्य मंडूकस्य वयोनिता। पुरुषस्यैउ

कस्यापि शुनो गर्दभस्य खरस्य च। अंतरागमने सद्यः प्रायश्चित्तमिदं स्मृतं। त्रिरात्रमुपवासः स्यात्त्रिरात्रं चाभिषेचनं।
ग्रामांतरं वा गंतव्यं जातु र्ब्यां नाच संशयः।। एतेनाध्ययनविच्छेदमनध्याय इत्युक्तं भवति। अंतरागमने इत्यनुवृत्तौ
हारीतः।। आरण्यकस्तकरस्य च हेयाम्यस्याहरीति क्वाभिश्रः। समाप्य वेदं त्रिदिनं वेदानध्ययनं भवेत्। आद्य
ध्ययने द्वितीये तु दिनमेकमिति स्थितिः। वेदं मंत्रब्राह्मणरूपं रेकं। इत्यहानध्यायाः। अथ पाक्षिण्यनध्यायः। त
त्रराजायनयोर्विषुवयोश्च पाक्षिण्यनध्यायः। दिवा तु तत्संक्रमे स्यर्वोभिररात्रिद्वयेपि।।**च**।। **तथा च गार्ग्यः**।। दि
वायनस्थितेमानुर्यदिरात्रापरापरे। नाधीयीतापिहनीरात्रौ वैवं विषुवयोरपि। तथान्याचिकदोदिन्याद्वयेचयत्रय
स्त्रिण्याः शौचं भवेत्तत्र सर्वत्र पक्षिण्यनध्यायः। अथाकालिकानध्यायाः। तत्र **मनुः**।। विद्युत्स्तनितवर्षेषु महोल्का ६५
नां च संप्लवे। आकालिकमनध्यायमेतेषु मनुरब्रवीत्। दृष्ट्वा विद्युदादिमादित्येशतिमेधातिथिः। प्रत्येकं निमित्त

तेनिर्देमाह। एतद्वर्षर्त्तौ। अन्यत्रौत्पातिके। तत्रापि मापांसु नपिरुदुवर्षविद्युत् चाप्रादुष्कृताग्निषु इति **गौतमो**
क्तेः।। संप्लवः इतस्ततः पतनं। आकालिको निमित्तकालादारभ्य परेद्युस्तं विज्ञेय एव कालः।। **मनुः**।। निर्घाते भू
मिचलने ज्योतिषां चोपसर्जने। एतानाकालिकान्विद्यादनध्यायानृतावपि। निर्घातो अंतरिक्षे उत्पातध्वनिः। उ
पसर्जनं परिवेषादि।। **मनुः**।। चौरैरुपद्रुते ग्रामे संभ्रमे चाग्निकारिते। आकालिकमनध्यायं विद्यात्सर्वाद्भुतेषु
च। अद्भुत उपद्रुतं। संभ्रमे भये।। **गौतमः**।। आह्निकानाकालिकस्तत्राप्याह्निकस्य योगवति। आह्निकं आह्न
कृत्यं। प्रतिपदीन्दूनां वा अहनां तमामं।। **भरद्वाजः**।। अस्मुत्साते पांसुवर्षे ग्रामे नाध्ययनं भवेत्। आकालिकमिति
अथैकरात्रानध्यायाः।। **योगीश्वरः**।। संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्य वेदं द्युनिशमारण्यकम
धीत्य च। पशुमंडूकनकुलश्वाहिमार्जारमूषकैः। कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये। अत्र च निर्माणां। प्रतिपद

हरणं वाल्लतात्रमामं ॥ भरद्वाजः ॥ अभ्युत्साते यां सुवर्षे ग्रामे नाध्ययनं न वेदः । आकालिकमिति अथैकतादिव
तुष्ठेऽहोरात्रपक्ष उक्तं न द्वितीयाध्ययनं । प्रथमाध्ययने तु प्रागुक्तमाकालिकत्वमिति विवक्षा । एवं शक्यातो वृप
योरपि प्रागुक्तं त्रिदिनं प्रथमाध्ययने द्वितीयादौ विद्यमेकरात्रमिति । अहोरात्रमित्यनुवृत्तौ वसिष्ठः ॥ फलान्यप
लिलान्मक्षान्यवास्तव्याह्निकं न वेलामतिरश्चापनध्ययनं पापास्याब्राह्मणानां स्मृता । इदमेकोद्दिष्टातिरिक्तप
रं । लवनन्तक्त्रिरात्रस्य प्रागुक्तत्वात् । एतदाकालिकत्वं गौतमोक्तमस्मिन्विषये तत्रत्वमाहपरं । नवश्राद्धनुक्तो
च नज रणपर्यंतमिति हेमाद्रौ स्मृत्यंतरात् । तथा दवमतिष्ठादौ महोत्सवेप्यहोरात्रं शातातपेनोक्तं ॥ गौतमः ॥
मकलोपादितवेदसमाप्तिछर्दिश्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रमिति । अभ्युत्सातउपाहितं । मनुष्ययज्ञोत्रा ६६
मनोज नमिति हेमाद्रिः ॥ यत्नागम्युत्साते आकालिकत्वमुक्तं तद्ग्रामे । एकाहस्तग्रामे । छर्दिने घृतं वा प्राश्याधी

यीतेत्याह पराशरः ॥ छर्दिं पित्वा स्वप्नांते घृतं वा प्राश्येति । स्वप्नांत मोहयादि इत्यर्थः । अहोरात्रमित्यनुवृत्तौ गोभि
लः ॥ मद्वलवारिणिप्रेते प्रेते तृतीयेतावपि ॥ हेमाद्रौ स्मृतिः ॥ शवानुगमनपरिवरणे शूद्रकाशशवदर्शनेवा
होरात्रमिति । तत्रैवांतरागमनेऽप्यनुवृत्तौ स्मृतिः । श्वसूकरमूषकसर्पनकुलादावहोरात्रं च मार्जारयो चेति । एतद्द्वित
याध्ययने प्रथमे त्वाकल्यहोक्तेः । अहोरात्रमित्यनुवृत्तौ गौतमं ऊर्ध्वं भोजनादुत्सवे प्राधीतस्य चेति । उत्सवेऽपद
पनादौ प्राधीतस्याध्ययने प्रथमं प्रवृत्तस्य । ऊर्ध्वं भोजनादित्युभयत्राचेति । अथ तात्कालिकानध्यायाः । हेमाद्रौ
स्मृतिः सर्वकुत्सितगंधेवपरिवाते मत्रास्तु च । अन्यं गेल्लानकाले च महावेदेति कंपने । गोविप्ररोधने सर्वराष्ट्रे क्षुभ्या
द्रुपं द्विषु । शाल्मलस्य मधूकस्य कोविदारकपित्थयोः ॥ श्लेष्मातकस्य छायायां चेति तात्कालिकानिद्धि । परिव
तंगते । महाषेदः । सामवेदस्मिन्सूयमाणे । श्राद्धपंक्तावुपविष्टो निषंग्यादिमंत्रातिरिक्तं नाधीयीतेत्याह याज्ञवल्क्यः ।

श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिस्वने। अमेध्यशवशूद्रांत्यश्मशानपतितांतिके। देशेशुचावात्मनिवि
द्युत्स्तनितसंप्लवे। भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते। पांसुवर्षेदिशांदाहेसंध्ययोर्नीहारभीतिषु। धावतःपू
तिगंधेचशिष्टेचगृहमागते। खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिका
न्विदुः। क्रोष्टाशृगालः। बाणोवंशः। विद्युत्संप्लवस्तनितसंपृक्तवर्षं तिग्मस्येकमन्ये। नीहारोधूमिका। पूतिगंधःकु
त्सितगंधः॥ शिष्टगृहागमनेतदनुज्ञावधिरनध्यायः॥ तथाच यमः॥ आगतंचातिथिंदृष्ट्वानाधीयीतबुद्धिमान्॥
अप्यनुज्ञापितेनास्मिन्नध्येतव्यंप्रयत्नतइति। ईरिणमूषरंमरुस्थलमितिवा॥ मनुः॥ नविवादेनकलहेनसेनायांन
संगरेनभुक्तमात्रेनाजीर्णेनवमित्वानशुक्तके। शस्त्रेणचक्षतेगात्रेरुधिरेणपरिप्लुते। विवादोवाक्पारुष्यं। कल ६१
होदंडपारुष्यं। शुक्तकमम्लोद्गारः॥ विष्णुः॥ नश्वशूद्रपतितयोःसमीपेनदेवायतनेश्मशानेचतुष्पथेषूदकां

तेषांटोपस्पृतपाहतेनाचांतोनविरिक्तोनाजीर्णइति॥ हेमाद्रौस्मृतिः॥ ज्ञाननगरदेशेननदिवसेवानध्यायः॥ विवाह
मौञ्जीपंचनप्रतिष्ठोद्यापनादिषुमार्जनसंमार्ष्टसपिंडसगोत्राणामनध्यायः॥ मार्जनंमर्दनकरणं॥ सत्राष्टिलिपि
न। ततःभवंति। अथयमज्योतिरनध्यायाः॥ मनुः॥ प्रादुष्कृतेष्वग्निषुतुविद्युत्स्तनितनिस्वने। सज्योतिःस्यादनध्या
यः शेषरात्रौयथादिवा॥ स्तनितंक्वचित्वचनंचेतिविग्रहः। प्रादुष्कृतेष्वितिसंध्याद्वयोपलक्षणं। तेनप्रातःसंध्यायांदि
वापरसंध्यायांतुरात्रिमितिसज्योति। शेषेहृष्टौयथादिवातथारात्रौचाहोरात्रमित्यर्थः॥ अत्रविशेषमाह पैठीनसिः॥
प्रदानुवर्षास्वेवसंध्यायांविद्युत्स्तनितंवातदासज्योतिरनध्यायइति। यत्तुप्रागेतदुक्तमेवसंध्यास्तनितेत्रिरा
त्रंसदवर्षासु॥ स्मृत्यर्थसारे॥ काकोलूककुक्कुटमूषकमंडूकाद्यंतरागमनेदिनेवेट्टिनांतरात्रौवेदुद्यत्वेतमन
ध्यायइति। एवंवारणमूषकेप्रागुक्तंत्रिरात्रं। ग्राम्यमहामूषकेतुप्रागुक्तमेकरात्रं। मंडूकेतुप्रागुक्तमेकरा

त्रंभ्रष्यमाध्ययने॥ इति यत्विदं सज्योतिरितिविवेकः। तथा यत्र यत्र सज्योतिराशौचं तत्र तावत्कालमनध्याय इति।
अत्रानध्यायपालनं ग्रहणाध्ययनप्रकरणोपादानेदं गत्वमामांसापांद्वादशेनिर्णीतं। तातचरणास्तुधारणाध्यय
नांगत्वमप्याहुरिति निर्णयपरिशिष्टे अथानध्यायापवादः॥ मनुः॥ वेदोपकरणे चैव स्वाध्याये चैव नैत्यके। नानुरो
धोस्त्यनध्याये होममंत्रेषु चैव हि। वेदोपकरणान्यंगानि। नित्यस्वाध्यायो ब्रह्मयज्ञः॥ शौनकोपि॥ नित्यजपे च का
म्ये च क्रतौ पारायणे तथा। नानध्यायोस्ति वेदानां ग्रहणे ग्रहणे स्मृतः॥ हेमाद्रौ स्मृतिः॥ प्रणवव्याहृतीनां च गायत्र्या
श्शिरसः सदा। देवतार्चनमंत्राणां नानध्यायः स्मृतस्तथा। तत्र विस्मृतिशालानां वक्तृवेदभयादिनां। चतुर्दश्यष्ट
मीपर्वप्रतिपद्वर्जितेषु च। वेदांगन्यायमीमांसाधर्मशास्त्राणि वाप्यमेन्ना। अथ ब्रह्मचर्यकालावधिः॥ तत्र देवलः॥ अ ६८
लः परमष्टाचत्वारिंशद्वार्षिकं वेदव्रतमिति श्वेताः अकं मेवल द्विंशद्वार्षिकं चतुर्विंशद्वार्षिकं चे। तच्च प्रतिवे

दानिप्रायं॥ तदाह बौधायनः॥ अष्टाचत्वारिंशतं वर्षाणि वेदब्रह्मचर्यं चरेच्चतुर्विंशतिं वा द्वादश वा प्रतिवेदमि
ति। मनुस्तु वेदग्रहणांतं वा ब्रह्मचर्यमाह। षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतं। तदर्धिकं पादिकं वा पक्षे प्रति
ग्रहणांतिकमेव वा॥ त्रिस्रो विद्या वेदत्रयं तत्संबंधि। अत्राद्यपक्षे प्रतिवेदं द्वादशवर्षं तदर्धिकपक्षे प्रतिवेदं षट्चतुर्थ
पादिकपक्षे प्रतिवेदं त्रिवर्षं। याज्ञवल्क्यस्तु प्रतिवेदं पंचवर्षपक्षमाह। प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा।
ग्रहणांतिकमित्येक इति। अथ नैष्ठिकब्रह्मचारिधर्माः॥ तत्र याज्ञवल्क्यः॥ नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनि
धौ। तदभावेस्य तनये पत्न्यां वैश्वानरेपि वा। उक्तविधिनानिषां मुक्तोतिं नयतीति नैष्ठिकः॥ बृहस्पतिः॥ संध्याग्नि
कार्यं स्वाध्यायं नैष्ठाधः शयनं दया। आत्सोसो नैष्ठिकः कुर्वंश्च ब्रह्मलोकमवाप्नुयात्॥ वसिष्ठोपि॥ संयतवाक्च
तुर्थषष्ठाष्टमकालभोजी भैक्षमाचरेत् शुद्धी नो जटिलः शिखाजटो वा गुरुमुपासीत। ताः स्ताध्याया सर्वलयं निवे

घृतदन्तधावनाद्युद्वर्तनखट्वाशयनदन्तप्रक्षालनाञ्जनाभ्यंजन वृक्षारोहणानायनशीलत्वविरहो मुपयादपश्यति॥ देवलो

पि॥ अग्न्यस्त्राक्षमालादंडकाष्ठकुंडिकामौंजमेखलाधारणं मध्वञ्जनं मलदवगाहनं तुनयकालमग्निहोत्रं

धेतापासनमवरुलोमतरवक्त्रगंधमाल्यस्त्रहास्यंजनवेषालंकारच्छत्रोपानह्वाहनलंघनमवनधनचनाविकिमाज्यो

तिषत्रतिमालक्षणवाक्यविद्यामंगलपौष्टिककर्मशांतिकर्मगांधर्वसिंघसमयवंधनशिल्पलेखनकारुकर्मविग्रहे

न्द्रयसनधनन्यपरिछिन्नान्यविद्याध्ययनराज्ञवालस्त्रीलापरिहासग्रयकरकुहकविस्मयविडंवनविवाहोत्स

कपरिवेदनपादोद्धर्तनानीति। एतच्च नैष्ठिकत्वं कुत्साद्दानांनिसमाह विष्णुः॥ कुकुमं वेनञ्जासंधञ्जश्चवपंचवरी

गिणां। ब्रह्मचर्यानि वेनेषांपावञ्जावमनंजतद्यति। अथ व्रतानि। तानि चाश्वलायनसूत्रे हयोभियमंस्याग्निमहा

नाम्न्यौपनिषदं स्यान्महाव्रतं। तृतीयं स्यादुपनिषद्गोदानाख्यं ततःपरं। अत्राह नृसिंहः॥ तिथिनक्षत्रवारांशव ६९

गोदियनिरीक्षणे। चौलवच्चवर्मांस्यातं सगोदानव्रतेष्वपि। व्रतानांचरणं त्वेवं कृत्वाम्नानं समाचरेदिति। अत्र

चक्रमेणजन्मतः त्रयोदशादिचत्वारिवर्षाणि चतुर्णां व्रतानांकाला इति प्रयोगपारिजाते। तत्र गोदानकालो

ध्यवच्छिन्नः षोडशो मनुना। केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः॥

एतच्च द्वादशवार्षिके वेदव्रते बोध्यं। इतरस्मिन्पक्षे यथामंतवं द्रष्टव्यमिति। विज्ञानेश्वरः॥ एतेष्वपि व्रतेषु कालमा

ह शौनकः॥ अथोदगयने शुक्लपक्षे ज्योतिषनक्षत्रे वेदव्रतानि वयारिविदध्यायथाविधि मुहूर्तचिंतामणौ। के

शांताः षोडशे वर्षे विलोकदिवसेष्वतः॥ व्रतोक्तदिवसे शस्तं समावर्तनकादिकमिति। तत्त्रिरोपाणामपि चत्वारि

व्रतानि। प्राजापत्यं सौम्यमाग्नेयं वैश्वदेवमिति। वाजसनेयिनांत्वष्टौ। सावित्रगोदानिकव्रातिकादित्यव्रतोपनि

षद्ज्येष्ठसामिकमहानाम्निकत्रैनिकसंज्ञानीति। अत्रवोपनयनमौंजीवज्यादानादपराशरः॥ यथयावि

सं०म०७०

हितं कर्मयिज्ञत्रैयालमेखला॥ योदंडोयच्च वसनं तत्तदस्य व्रतेष्वपि॥ अथ समावर्तनं॥ तत्र याज्ञवल्क्यः॥ गुरवेतु
वरं दत्त्वा स्नायीत तदनुज्ञया॥ वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥ अत्र गुरवे तत्पवरं मनुराह क्षेत्रं हिरण्यं
गामश्वं छत्रोपानहमंततः॥ धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरन्॥ अयं च वरो गुरुः प्रार्थयेन्नित्तुविद्यानिष्क्रा
ये॥ वेदानां तुल्यासं नवाला तथा च तापनीयस्मृतिः॥ ममदापयन्त दद्याद्दक्षिणा यं न कल्पते॥ अत्रैकादशाब्दा
न्युपकल्प्यान्याह आश्वलायनः॥ अथैतान्युपकल्पयीत समावर्त्स्यमानो मणिं कुंडले वस्त्रयुग्मं छत्रमुपानहौ दंडं
स्रजमुन्मर्दनमनुलेपनमंजनमुष्णीषमित्यात्मने चाचार्याय च यद्यन्यो न विंदेताचार्यायैव॥ उन्मर्दनं कल्कं
फलस्य॥ इदं च कमंडलुवरज्ञावल्लित्केस्त्वयमेव कार्यं॥ तद्गं नांदीश्राद्धमपि॥ तथा च शौनकः॥ कुर्वीत स्वयमेवेदं ७०
कर्म चाचार्यनिरपेक्षतः॥ विश्वयामुद्दश्याद्दं हरेकिकरपरेस्तनिण्वनातवरणै तेन निर्णयपरिशिष्टे समयं चनुक्तं॥

मण्व॥ गोदाने नातिदिष्टत्वात्कर्मणोस्योत्तरायणं॥ सर्वपक्षादियोगेवमतः॥ स्यस्यैतदावरेत्॥ देवरातः॥ विशिष्ट
तु विरिक्तास्तुतिथिषु स्नानमाचरेत्॥ अस्य षष्ठमां द्वादश्यां छिद्रा॥ नक्षत्राण्याह वसिष्ठः॥ आदित्यसौम्यसावित्र
मैत्रतिष्योत्तरात्रयं॥ पौष्णश्रवणरोहिण्यश्वेष्ठाः स्युः स्नानकर्मणि॥ आदित्यं पुनर्वसुः॥ सौम्यं मृगशीर्षं॥ सावित्रं हस्तः॥
मैत्रमनुराधा श्रवणौ श्रवणः॥ वाराश्च धराये॥ शशांकज्ञानुगुरुविद्युक्रांशवारादिष्विति॥ देवरातः॥ स्नानं मध्यमकं का
ले तु होरायां भास्करे कुजे॥ सर्वहितं तदभावे तु कुर्यात्स्नानं यथाविधि॥ अथ समावृत्तधर्माः॥ तत्राश्वलायनस्मृतिः॥ स्ना
तैर्वविविनाकालमनासमात्रमपि द्विजः॥ अनाश्रमी न तिष्ठेत्तु स्वस्थः प्रयतात्मवान्॥ निवृत्तोरोग्यदितो जातस्वाप
न्नोन्यस्यकारणे॥ स्नातकः प्रयतो वह्निं त्यजेदिति वै स्मृतिः॥ नित्यदा ब्रह्मचारी स्यात् संचयं पञ्चपरायणः॥ जीपति
र्गतोवाश्रमः स्नातकोलोल्यवर्जितः॥ श्राद्धं निमंत्रितोगच्छेत्कुर्यान्सिद्धं च न चिद्दिजः॥ येनकेनाप्युपायेन व्रतच

यन्निलोपयेत्। शाकलांश्च कुर्यात्स्नानसंध्यैः काम्यमेव च। कूर्पाधिष्ठानविधियोक्तान्ते को न तु यज्ञनामिति। अ
त्र च वह्निं न त्यजेदिद्ध कृत्वा शाकलांश्च कुर्यादिति वाक्यैः संध्योपास्तिनिराज्ये नाग्निकार्यं कृत्वाद्यादशशाक
लांश्च कुर्यात्। अग्निकार्यं चैतेषामपि। नोक्तैतरप्यविरोधाद्। अध्ययनोक्त्या तथा वैश्वदेवमपि शाकलमंत्रैरेव का
र्यं॥ कौर्मे॥ यज्ञोपवीतद्वितयं सोदकं च कमंडलुं। छत्रं चोष्णीषममलं पादुके वाप्युपानहौ। रौक्मे च कुंडले वे
णुं च कृत्तकेशनखः शुचिः। स्वाध्याये नित्ययुक्तः स्याद्बहिर्माल्यं न धारयेत्। शुक्लांबरधरो नित्यं सुगंधः प्रियदर्श
नः। न जीर्णमलवद्वासा भवेच्च विभवे सति। न रक्तमुल्बणं चान्यधृतं वासो न कंथिकां॥ आश्वलायन॥ तस्यैता
नि व्रतानि भवंति नक्तं स्नायान्न नग्नः स्नायान्न नग्नां स्त्रियं। चेतान्यत्र मैथुना इति निध्यावेत्न हत्समाराहेत्क ७१
यन वरोदेत्र संस्नायमन्यापद्येतेति। संस्नायः प्राणसंस्नायः। अत्र तस्येत्यनेन समावृत्तमात्रोक्तेस्त्रैवर्णिकसाधा

रण्यं ब्रतानां न ब्राह्मणमात्रविषयत्वमिति पितामहचरणाः। पितृचरणाः। अपि द्वैतनिर्णयपरिशिष्टे। अत्र विवा
हार्थं काम्यतया उक्तं ऋग्विधाने। कुसुमं प्रजपेत्सूक्तमथ मन्यकाचिचालये। अयुतं तु जपेत्कन्या जपेनाम्नाहवन्हैन
र इति। इति समावृत्तधर्माः॥ अथ विवाहः। तत्र विवाहशब्दार्थो यद्यपि कन्यायाः सप्तमपदे जनिक्रमे मुख्यः नोदकेनन
वा वाचा कन्यायाः पतिरुच्यते। पाणिग्रहणसंस्कारात्पतित्वं स्यात्सप्तमे पदे इति यमोक्तेस्तथापि तत्र कुशादि विहित
नानाविधमाध्यके कर्मसमुदाये वर्तते। स च समुदाय उपाधिभेदात्ब्राह्मादिव्यपदेशमेवं लभते। तदुपाधित्वेनेव वद
त विवाहशब्दयोः सामानाधिकरण्यं। यथालंकृत्य कन्या सानुरूपवरायदद्यादेष ब्राह्मो विवाह इति। न पुनर्दानमेव वि
वाहशब्दार्थ इति। तथा मतिः पुरगयनभ्राप्तिर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः इ
त्युक्तायदुक्तं तेषां पुरस्तान्नत्वत्वाज्याहुतीर्जुहुयादिति तत्रापपद्यते। नहि कन्यादानानंतरं होताश्र कु

तयामंति। तस्माद्दानविवाहयोर्नैदान्तरं निषेधयिनो। पद्यो। सामानाधिकरण्यमुपचारेणैव व्याख्येयं। अथविवाह
भेदास्तच्य वक्ष्यते ॥तत्र मनुः॥ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः। गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमो
धमः॥ याज्ञ ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। तज्जः पुनात्युभयतः पुरुषानेकविंशतिं। यज्ञस्थ ऋत्वि
जे दैव आदायार्षस्तु गोद्वयं। चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट्। इत्युक्त्वा चरतां धर्मं सह या दीयतेर्थिने। स का
यः पावयेत्तज्जः षट् षड् वंश्यान्सहात्मना। सहधर्मं चरतामित्युक्ते त्यन्वयः। कायः प्राजापत्यः। आसुरो द्रविणा
दानाद्गांधर्वः समयान्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्। छलं विविनक्ति ॥श्वलायनः॥ सुप्तानां प्र १२
मत्तानां वापहरेत्पैशाचः। आसुरगांधर्वादिविवाहेष्वपि न तन्मात्रेण भार्यात्वसिद्धिः। किंतु सप्तपदीविक्रमणे
दिना॥ तथा च देवलः॥ गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः। कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः। अत एव मि

ष्ठोपि। व्यतिरेकमुखेनाह। बलादपहृता कन्या मंत्रैर्यदि न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥ अत्र
विवाहव्यवस्थामाह ॥मनुः॥ षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्। विट्शूद्रयोस्तु तानेव विद्याद्धर्म्याननराक्षसान्।
ब्राह्माद्या गांधर्वांताः ब्राह्मणस्य षड् धर्म्याः। क्षत्रियस्यावराश्चत्वार आसुराद्याः पैशाचांताः। त एव वैश्यशूद्रयो राक्षस
वर्ज्याः। उक्तेष्वपि प्राशस्त्यमाह ॥स एव॥ चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः। राक्षसं क्षत्रियस्यैकमासुरं वैश्य
शूद्रयोः ॥पुनर्मनुः॥ पंचानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह। पैशाचश्चासुरश्चैव न कर्तव्यौ कथंचनेति। तत्र त्रि
यादिविषयं न ब्राह्मणविषयं। राक्षसे विरोधात् न समो वधादिकर्तुमर्हतीति मेधातिथिः। तत्र हरित्रि ब्राह्मणपरतया।
ति कुल्लूकः। पंच च प्राजापत्यान्यत्तिन प्रवहेत्तुत्वेनैवोक्ताः। पैशाचप्रतिषेधादिति। अतो ब्राह्मादयः पंचेति माधवो
क्तिः। परास्त्वन्यविवाहालाभे ब्राह्मणादीनां पैशाचोप्यनुज्ञात मनेनवोपायैरसाध्यमस्याः कन्यापुरुषस्यया।

चौर्येणाभिविवाहेनसाविवाहास्थितेतिवचनवचनादितिमाधवः॥युक्तंचैतदितिपरमगुरवः॥तथाहि। ऋत्वि
यादेः ह्यस्यचतुरोवरानिसतएवपैशाचब्राह्मेऽन्नराक्षसाधारस्येनवप्रवर्तितावएवतच्छिद्रेब्राह्मणंप्रसेवाप्रा
जस्यायंविधिरयंवानेति। केचिद्गोमिथुनरूपशुल्कस्यापिनिषिद्धत्वादार्षमपिनिषिद्धमाहुः॥ तथाचमनुः॥ न
कन्यायाःपिताविद्वान्गृह्णीयाच्छुल्कमण्वपीति देवलोपि॥ एतेविवाहाश्चत्वारोधर्म्यास्त्रोपप्रदानजाः। अशु
ल्कोब्राह्मणाद्यास्त्रितारयंतिद्वयोःकुलं॥ कश्यपोपि॥ क्रीताद्रव्येणयानारीनसापत्नीविधीयते।नसादैवेनसा
पित्र्येदासींतांकवयोविदुः॥ मनुरपि॥ आर्षेगोमिथुनंशुल्कंकेचिदाहुर्मृषैवतत्। अल्पोपिवामहान्वापिविक्रयस्ता
वदेवसितिः। तस्यमेवमात्मार्थधनग्रहणे। कन्यार्थेतुनदोषः। यथाहमनुः॥ यासांनाददतेशुल्कंज्ञातयोनसविक्र ७३
यः॥ अर्हणंतत्कुमारीणामानृशंस्यंचकेवलमिति। यत्कन्यायैदीयतेतदर्हणंपूजा। आनृशंस्यमपापित्वं॥ या

ज्ञवल्क्यः॥ अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत्। अनन्यपूर्विकांकान्तामसपिंडांयवीयसीमि
ति। अयमर्थः। अविप्लुतमस्खलितंब्रह्मचर्यंयस्यसः॥ विकल्पेनोक्तंनष्टाप्यविप्लुतोपि। लक्षण्यांबाह्याभ्यंतरल
क्षणैर्युक्तां। तानिचमिताक्षरायामपरार्केचद्रष्टव्यानि। स्त्रियंनपुंसकत्वनिवृत्तये। अनन्यपूर्विकांदानेनोपभो
गादिनावापुरुषान्तरायास्पृष्टां। कांतांवरस्यमनोनयनानंदजनिकां। असपिंडामिति। अत्रकान्तवरणेपद्य
प्यपर्यंनेव्यमासबलात्पर्युदासःप्रलापतेनप्रतिषेधः नञोहिक्रियान्वयेसनवति। तदुक्तंनिपुणैःसमप्रति
षेधोयंक्रिययासहयत्रनञिति। यद्यपिपर्युदासेनाप्यनुष्ठानेपर्युदासेनदोषोनबोध्यते। अविहिताप्रतिषिद्ध
त्वात्तथाप्यसपिंडाविवाहेप्रायश्चित्तानानात्पर्युदासोप्ययंनिषेधतुल्यफलः॥ इदंचसापिंड्यंमाधवस्मृतिचं
द्रिकाकाराभ्यांनिर्वाप्यपिंडान्वयेनप्रतिपेदिरे। तथाहि। समानएकःपिंडोयस्याःसासपिंडाअसपिंडानभवतीस

सं०म०७४

सपिंडतां। सपिंडता वैकस्यां पिंडदानक्रियायां दातृत्वेन पिंडभाक्त्वेन लेपभाक्त्वेन वानुप्रवेशाद्भवति। उक्तं च
मात्स्ये॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः॥ पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति। अयमर्थः।
एकपिंडदानक्रियानुप्रवेशः सापिंड्यहेतुः तथा च देवदत्तस्यैकस्य स्वकीयैः पित्रादिभिः षड्भिस्तथा पुत्रादिभिः सा
पिंड्यमिति। तदयुक्तं। भ्रातृपितृव्यादौ परिगणितेषु अनंतर्भावेन सापिंड्याप्राप्तेः॥ ननु उद्देश्यदेवतैक्यं न क्रिये
क्यमत्र विवक्षितं। तथा च देवदत्तक्रियायां ये देवतात्वेनानुप्रविशंति तेषां मध्ये वा कश्चित् भ्रातृपितृव्यकर्तृकक्रि
यायामप्यनुप्रविशत्येवेति सापिंड्यं भवत्। एवं समस्तसंततिज्ञानां॥ अत्र मंतलेकत उद्देश्यभेदेन क्रिया भेदात्सा
पिंड्यनिवृत्तिरिति चेत्। न। एवमपि मातामह्या नप्त्रा सिद्धः असापिंड्यापत्तेः॥ ननु तस्या अपि नप्तृकर्तृकपिंडदानक्रिया ७४
अयितमिति तयोरपि सापिंड्यं स्यात्। अथेदमेकगोत्रत्वे सति विशेषणेन परिष्क्रियते। तत्र। तथा सति सगो

त्राभावेनासापिंड्यापत्तेः॥ अस्त्विति चेन्न तथा सति। आशौचादिव्यवस्थानुपपत्तेरापातात्। स्याच्च परस्परं
विवाहप्रसंगः किंच। एकपिंडदानक्रियान्वयित्वस्य सापिंड्यप्रयोजकत्वे पैतृष्वस्रेयामातुलकन्ययोर्वर
हसापिंड्यं न स्यात् असापिंड्ये च परिणयनप्रसंगात्। अस्तु परिणयनमिति चेन्न स्मृतिविरोधात्॥ तथा च
मनुः॥ पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च। मातुश्च भ्रातुराप्तस्य गत्वा चांद्रायणं चरेदिति। शा
तातपोपि। उद्वहेत सगोत्रां यस्तनयां मातुलस्य च। ऋषिनिर्दैवतुल्यां च मतं चांद्रायणं चरेदिति। भ
गिनीपदं सर्वविशेषणं। अन्यथा एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमानिति सप्तमवाक्ये तिस्र
इति पदानन्वयप्रसंगात्। मातुश्च भ्रातुराप्तस्य सुतामित्यश्वमहार। ऋषिनिस्कल्पां सप्रवरामित्यर्थः।
नन्वेतयोर्वाक्ययोः पुत्रिकाकरणासुरादिविवाहोढाविषयत्वान्नविरोध इति। अत्रोत्तरं मातुरुच्चर

णैरेव पार्थसारथिमिश्रैर्मातुलकन्यापरिणयनस्य दुराचारत्वमुपपादितं दिक्‌ शास्त्रदीपिकाप्रकाशे एवोक्त
मिति नेह प्रतन्यते। किंच त्रिवर्ष्यपिंडान्वयेन सापिंड्ये त्वान्नार्ययोरसापिंड्यापत्तेः॥ अथ तयोरपुत्रत्वे वै
श्येवपत्यादित्रयश्राद्धाधिकारात्‌ त्वात्रोरिव त्रिपिंडदानक्रियानुप्रवेशिनोरप्येकोद्दिष्टयावच्छेदेनैकक्रिया
न्वयसंभवएवं तयोरप्याप्तिः। एवमपि भ्रात्रादिविवाहितो तत्र सपत्नीदौहित्रस्यापुत्रमातामहश्राद्धाधिकारात्सापिंड्या
पत्तिरितिनिवन्धनहानिप्रसंगः। अथ दत्ताश्राद्धमेव सापिंड्यघटकमुच्यते तत्र पूर्वोक्तावच्छेयोत्पत्ति नार्ययोरस्ति
अपुत्रमातामहस्यतु दत्तोभ्राद्धं तरोदौहित्रस्य विहितमिति एकत्र सत्वं अपरत्र वा सत्वं सापिंड्ययुक्तमिति। तत्र।
विवाहात्पूर्वमपि तत्पत्नीभ्रात्रोरन्योन्याचार्यमदेकपिंडदानक्रियाननुप्रवेशाद सापिंड्यापत्तेः॥ अथ पत्न्योरपुत्रत्वे ७५
वैधव्ये च स्वनार्तस्य भ्रातृनिमित्त्यस्य पितृव्यस्य तथैव च विधवाकारयेत्‌ श्राद्धं यथाकालमतंद्रितेतिवचनेन दत्ता

दौ श्राद्धविधानात्‌ कदाचित्तावदेकोद्दिष्टैकश्राद्धानुप्रवेशोस्तीति सापिंड्यमुपपाद्यतेत एवं तर्हि भ्रातृविवाहो
दाया अप्येतत्संभवतीति भ्रातृविवाहे दानेन सापिंड्यनिवृत्त्यविधानमसंवद्धमेव स्यादित्यलमतिप्रसंगेन।
मत्स्यपुराणस्यत्वयमर्थः। लेपभाजश्चतुर्थाद्याः पितामहपितावश्चतुर्थस्तदाद्यास्त्रयः। पित्राद्याः पिंडभागि
नः पिंडदाने देवताः पिंडदः सप्तमः एतात्सप्तपुरुषान्सापिंड्यं प्राप्नोतीत्युक्तं भवति न तु सापिंड्यं पूर्वोक्तं लेप
भाक्त्वादि लिमित्तमिति। तथा सति पूर्वोक्तदोषापत्तेरिति। परमगुरवस्तु। सत्यपि लेपभाक्त्वादौ सापिंड्यप्र
योजकत्वेनानेन विवाहनिषेधमपेक्षितं सापिंड्यं प्रतिपाद्यते किं तु सपिंडाशौच प्रतिपादक वचनाद्युक्त
मिति। अन्यथा पूर्वोक्तदूषणप्रसंगादित्यपि माध्यवचनव्यवस्थामाहुः॥ तस्मात् त्रिवर्ष्यपिंडान्वयलक्षणस्य
सापिंड्यस्य बहुदूषणग्रस्तत्वादेकशरीरावयवान्वयरूपमेव मिताक्षरायुक्तं सापिंड्यं वर्णनीयं। अस्मि

अपत्ये ईदृशी। असपिंडापदव्याख्या। समानः पिंडो देहो यस्याः सा सपिंडा सपिंडा न भवति असपिंडा तां। तच्च
पुत्रादीनां पित्रादिभिरेकशरीरावयवान्वयेन। एवं मातृशरीरावयवान्वयेन मात्रा। तद्द्वारा च मातामहा
दिभिरपि। तथा पत्न्याः सह पत्या एकशरीरारंभकतया। एवं भ्रातृभार्याणामपि परस्परमेकशरीरारब्धैः
सहैककार्यकर्तृत्वेन। न चान्योन्यायोगादकृतयैवैकशरीरानारंभयोर्विवक्षितः। किंत्वाधाराधेयतापि। इतर
या भ्रातृभार्ययोरस्यादेकैकाभावादुत्पाद्यैक्याभावाच्चासापिंड्यापत्तेः। अस्ति तु तयोः स्वस्वपतिभ्यां न
रूपेण हि ताभ्यां शरीरावयवान्वयात्ताभ्यामस्तैत्यविहतसापिंड्यं। एवमेव स्नुषायाः श्वशुरेण सह सापिंड्यं एते
न पिताऽन्यथा एकशरीरार्थमनुबुद्धिवजामात्रोस्सापिंड्यमापादयंतो निरस्ताः। अवश्यं चैकशरीरावयवान्वयेन सापिं
ड्यं वाच्यं आत्मा हि जज्ञे आत्मन इत्यादिश्रुतेः। स एवायं विरुद्धः भ्रातृद्वारेणोपलभ्यते इत्यापस्तंबस्मृतेश्च। ७६

ननु दत्तकादिषु एकशरीरावयवान्वयाभावात् अव्यापकमिदं सापिंड्यमिति चेन्न। मुख्यसापिंड्या
भावेपि पुत्रप्रतिनिधिविधिबलाद्दानविधिबलाच्च गौणसापिंड्यस्य कल्पने वाल्पांस्वपुत्रस्यैवसं नवा
त्। एतच्चाग्रे उपपादयिष्यते। एतस्यैव सापिंड्यस्य वरेऽपि तिदेशमाह याज्ञवल्क्यः॥ एतैरेव गुणैर्युक्तः सव
र्णः श्रोत्रियो वरः इति। एतैः पूर्वोक्तैरसपिंडत्वादिभिरित्यर्थः। अतएव वरनिरूपितं कन्यायां कन्यानिरूपि
तं च वरे द्वयोरेव सापिंड्यं न तु संयोगवदुभयाश्रयं एकनिरूपितमेकमेवयतोन्यतरत्रोनिवृत्ते तस्मिन्निवृत्ते
न। तथा सति कन्यावरयोरन्यतरस्य सापिंड्यविशेषणवैयर्थ्यापत्तेरन्यतरत्रैवलक्षणोपन्यासात्रोक्ते। फलत्वा ना
त। तथा वसिष्ठस्तत्र ब्राह्मणानामवैराणामविप्रतिपत्तेर्व्यवहारः। एकतो निवृत्तं सापिंड्यं नान्यतरः इति। न त्वेव
मगम्यागमने पिंडल्यगम्ययोरेकशरीरारंभकत्वात्सापिंड्यापत्तिः। अत्र केचित् अनिषिद्धत्वे सतीति वि

शेषणात्सापिंड्यमिति। तच्चिंत्यं रजस्वलादौ नाम्नमार्याणामपि निषेधात्। गुरुवरणास्त्। अनिषिद्धत्वेन तौति
विशेषअनिवारत्वेसति विशेषणीयं। अनिवार्य्यश्च नार्य्यातिरिक्तस्त्रीगमनरूपो लोकप्रसिद्धः। ततश्च एक
शरीरावयवान्वयाविच्छिन्नसंतत्या नार्यातिदतिरिक्तायाः स्त्रीत्वगमनप्रतिषेधेय त्राचयवान्वयेनास्तिलाद्
शरीरावयवान्वयः पुत्रादिषु नार्यायां वास्तीति न काचिदनुपपत्तिरिति समादधुः। ननु एकशरीरावयवान्वय
रूपस्य सापिंड्यस्य साक्षात्पारंपर्येण वा क्वापि सर्वस्य अनादौ संसारे तत्संभवादतिप्रसंग इति चेत्। न। वचनेनैव
संकोचितत्वात्। तथाच याज्ञवल्क्यः॥ पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति। अस्यार्थः॥ वधूवरान्यतरस्य
पितृतः पितरं गृहीत्वा गण्यमाने यः सप्तमस्तदूर्ध्वं सापिंड्यं निवर्तते। एवं मातृतो मातरं गृहीत्वा यः पंचमस्तदू ७७
र्ध्वमिति। अयमेवार्थः स्पष्टीकृतो नियुक्तैः। वधूवरस्य वा तातः कूटस्थाद्यदि सप्तमः। पंचमी चेत्तयोर्माता सा

पिंड्यं तन्निवर्तते इति। कूटस्थो मूलपुरुषः। संतानभेदे वधूपक्षे संतानभेदः समादाय गणयेद्यावद्वधूवरान्यतर
पिता सप्तमस्तन्माता च पंचमीति। अत्र सापिंड्यमपि पिंडशब्दोवयववाच्यावर्त्मानोपि पंकजादिशब्दवद्रूढोपि। तेना
न्यथासिद्धिः। एवं च पित्रादयः सपिंडाः पुत्रादयश्च सपिंडाः। अमुमेवार्थं तारडोप्याह मातृतः पंचमादूर्ध्वं पितृतः स
प्तमात्तथा। गृहस्थ उद्वहेत्कन्यामन्यथा गुरुतल्पग इति। पैठीनसिरपि। पंचमीं मातृतः परिहरेत् सप्तमीं पितृत
इति॥ यच्च विष्णुपुराणे॥ पंचमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीं। गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृप। यदपि
वसिष्ठेनोक्तं पंचमीं सप्तमीं चैव मातृतः पितृतस्तथेति तदुत्पन्नं समपंचममतोरेव धर्मद्वारेण योज्यं। अन्य
था हृद्धेपि न्यायस्ववचनविरोधात्। सप्तमे पंचमे चैव येषां वैवाहिकी क्रियाः क्रियापरा अपि हि ते ताः शूद्रत्वं गं स्यवेतें ३
ता इति मरीचिवचनविरोधाच्च। यदपि मनुवाक्यं। सपिंडता तु पुरुषे सप्तमे विनिवर्तते इति। यच्च गौतमवाक्यं

पिंडनिवृत्तिः सप्तमे पंचमे वेति। तदप्यधमद्वारेण व्याख्येयमिति मान्याः॥ यत्तु षड्विंशन्मते॥ तृतीयां मातृतः कन्यां
तृतीयां पितृतस्तथा॥ विवाहयेन्मनुः प्राह पाराशर्यो गिरा यम॥ यच्च चतुर्विंशन्मते। तृतीयां वा चतुर्थीं वा पक्षयो
रुभयोरपि। विवाहयेन्मनुः प्राह पाराशर्यो गिरा यम। यदपि पैठीनसिवाक्यं। त्रीनतीत्य मातृतः पंचातीत्य पितृत
इति यच्च वाजसनेयके। तृतीये संगच्छावहै चतुर्थे संगच्छावहै इति तत्सर्वमर्वाक्निषेध्यमिति तु विज्ञाने
श्वरः। तस्यायमाशयः। न ह्यदितावदेवमुच्यते। ब्राह्मादिविवाहेषु दानात्सापिंड्यनिवृत्तेस्तत्रोत्तरत्राप्यसपिं
डैवेति दाक्षिणात्यानां मातुलकन्यापरिणयस्य परिणयनावरणविषयदोषाभावाद् इति। तत्रैवापादाद्यपि
निरालिते नरित्यादिलिंगमपि दृश्यत इति तद्युक्तं। दानेन सापिंड्यनिवृत्तौ प्रमाणाभावात्। ननु ब्राह्मा ७८
दिषु विवाहेषूपात्तदत्ता कन्यका भवेत्। नन्दीगोत्रेण कर्तव्यानस्याः पिंडोदकक्रियेति मार्कंडेयपुराणं प्रमाणं

भविष्यतीति चेत्। न। अस्मिन्वाक्ये सापिंड्यगंधस्याप्यनाकलनात्। गोत्रव्यवस्थामात्रपरं हीदं वचनं न सापिं
ड्यव्यवस्थापरं। न ह्युदकदानस्य दातृसापिंड्यनिवर्तकत्वं प्रसिद्धं। न सापिंड्यसंपादकत्वं दृष्टं। ब्राह्मादि
विवाहचतुष्टयेऽपि तथैव कल्प्यमिति चेत्। न। सामान्यतो दृष्टस्येदृशे विषये प्रामाण्यायोगात्। किंच पुत्रप्र
तिग्रहविधेरवयवानुवृत्तिप्रयुक्तकार्यनिवृत्तिरुक्ता दयितुः प्रतिग्रहीतुश्च तत्कार्यप्रवृत्तिरेव प्रयोजनं कन्याप्र
दानं तु पितृकर्त्रादातिमहदृष्टार्थं। किंच यदि ब्राह्मादिविवाहचतुष्टये दानेन सापिंड्यनिवृत्तिस्तदा मातृपक्षमात
कन्या तु परिणेया स्यात्। अथैवमुच्येत। दानेन सापिंड्यनिवृत्तावपि असपिंडामिति च निषेधे चतुर्थादौ प्र
वृत्तेऽपि षड्विंशन्मते चतुर्विंशन्मते च तु विंशतिमतपैठीनसिवाक्यैर्विशेषविषये सामान्यविशेषन्यायेन सा
मान्यरूपः सपिंडानिषेधो बाध्यत इति। तदपि न। असपिंडामित्यस्य सामान्यशास्त्रत्वाभावात्। तथा हि अ

सं०म०७६

मपिंडामित्येतत्संचमात्सप्तमाद्ध्वमित्येतद्यान्योन्याकांक्षया विवाहप्रकरणआम्नातावेवमेकवाक्यतामा
पद्यतेसप्तमनोद्वहेदिति। सतदुत्सतापिविषयीकुर्वन्निषेधोऽयं विशेषशास्त्रमेवज्ञातमितिनषट्त्रिंशन्म
तादिनिःसामान्यविशेषन्यायेनवाध्यते। एतेनयत्किंचित्प्राचीनमतंशोमीयात्रेनोपांशुवरंनीत्यस्यायाव
त्यावावाकामयानताचत्यादौद्वुणीयायामनुद्रूयादित्यनेनेववाधकाशानारवकाशन्यायेनवाधोऽपिप
राणः। किंच। यथासंख्याधिकरणेचोदकोपदेशयोर्विरोधेयागांतरकल्पनयासमाधीयतेतथेहापिसप्त
नपरिगणस्यास्मृतार्थापरिगणयेतरत्सनयोर्विरोधेद्वितीयादिपरिगणेदोषाधिक्यकल्पनयासमाधीयनइति
नकिंचित्केनचिद्वाध्यमिति। अनेनैववातिन्यायेननिषेधपरंतत्पुत्रदोषप्रतिपादनार्थंमुक्तमिति। अ ७९
नेनैववानिप्रयोज्युर्यचसंनिहितेसंबंधेरोपाधिकंव्यवदितसंबंधेदोषाल्पत्वंसर्वेषामिष्टमेव। नहिनिरु

द्वाहेपितृव्यपुत्र्युद्वाहेचतुल्योदोषः। एवंप्रपितामहस्यचतुर्थादीनांवमंततीयेज्यं। अतएवतत्क्रमने
प्रायश्चित्ताल्पत्वमहत्वेस्मृतिषुक्ते। एतेनमाधवाचार्यैःषट्त्रिंशन्मतादिविशेषवाक्यानामवांछिषेधार्थं
त्वमुक्तायत्स्वंतरंहतंचानुकल्पोवेति। तदप्यपास्तं। अनुकल्पत्वेपिद्वितीयचतुर्थपंचमषष्ठानांतुल्या
नुकल्पत्वायोगात्। आवश्यकीदोषगुरुत्वलघुत्वावकल्पना। एवंचेत्सैवास्तुकिमनुकल्पत्वकल्पनयेति।
किंच। नैवबाल्यादिविवाहमासिंध्यनिषेधप्रवृत्तेरेवोक्तत्वात्कन्यासंतानेसर्वत्रापिदोषान्नावानुकल्पइत्या
तुरादिविवाहविषयएवानुकल्पसंभवस्तेषां। आयस्वर्वतंनिषेधति। तृतीयांमातुलःकन्यांतृतीयांपितृ
स्वस्यांतस्तुस्यांतन्यांोद्वहिष्यंतिविप्राःपापविमोहिताः। मातुलस्यसुतामातुलमुता। पितृस्वसृतीयापितृस्वसे
य। ब्राह्मादिविवाहेतुसापिंड्याभ्युपगमवादिनांकेषांचिदनुकल्पोनेष्टएवयच्च लिंगदर्शनंतद्ब्राह्मणत्वना

प्युपपन्नेर्न विधिकल्पकमित्यलं। एवं स्वसपिंडानिषेधउक्तः॥ मनुः॥ असपिंडा च या मातुरसगोत्रा च या पि
तुः॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने इति। अत्राद्यचकारात् असगोत्राद्वितीयचकारादपितुरसपिं
तिमाधवः॥ तथा च व्यासः॥ सगोत्रां मातुरप्येके नेच्छंत्युद्वाहकर्मणीति। शातातपोपि। मातुलस्य सुतामूढ्वा
मातृगोत्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेत्॥ एतत्तु त्रिकाकरणविषयमिति स्मृतिचंद्रिकापां।
मांध्यंदिनविषयमिति मन्यामहे। दत्तकादेर्बीजिकुलेपि पितृतः साप्तपुरुषं मातृतः पंचपुरुषमेव सापिंड्यं।
तदाह गौतमः॥ ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबंधुभ्यः पंचमादिति। एतच्च व्यामुष्यायणपरं। केवल ८०
स्य तु गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधेति मानवे जनककुले
सपिंड्यनिवृत्तेरुक्तत्वात्तन्न सपिंडो वक्ष्यति। क्वचित्त्रिपुरुषं सापिंड्यमाह वसिष्ठः॥ प्रत्तानां तु स्त्रीणां त्रिपुरुषमि

ति। तत्तु त्रिकाविषयमिति स्मृतिचंद्रिकायां। अन्यत्रापि तदाह विदयपेकजाता बहवः पृथक्क्षेत्राः पृथक
जनाः॥ एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिषु॥ अस्यार्थः। एकस्माज्जाता अनेन देजाताः ये पृथक्क्षेत्राः स्वस्व
क्षितानीयस्त्रीषु जाताः पंच पृथक्जनाः स्वसमानजातीयस्त्रीषु जाताः तेऽन्योन्यमेकपिंडाः सपिंडाः किंतु
पृथक्शौचाः। पिंडः सापिंड्यं तु त्रिष्वावर्तते त्रिपुरुषमेवेति। एतच्चोढासु वोढृभ्यो ये उत्पन्नास्तत्परं। सवर्णेभ्यः
सवर्णासु जायंते हि जातयः। अनिंद्येषु विवाहेषु पुत्राः संतानवर्धनाः॥ विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः
स्त्रियां। अंबष्ठः शूद्र्यां निषादो जातः पारशवोपि वा। वैश्यायां राजन्यात् माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु क
रणः शूद्र्यां विन्नास्वेष विधिः स्मृतः इति योगीश्वरोक्तेः। एवं माहिष्येण करण्यां तु रथकारः प्रजायत इति तदुक्तेषु सं
कीर्णसंकरजेष्वपि त्रिपुरुषमेव सापिंड्यं। ये तु प्रतिलोमजाः। ब्राह्मण्यां क्षत्रियात् सूतो वैश्याद्वैदेहकस्तथा। शूद्रा

सं०८२

२०

ज्ञातत्वं वाज्ञलःसवर्धमविद्विष्टुतः॥क्षत्रियामागधंवैश्यात्शूद्रात्क्षत्तारमेव च॥शूद्रादायोगवं वैश्याज्जपान
मासवैसुतंमिति॥तेनैवोक्तास्तत्रैनैतत्रिपुरुषं॥अपिवारोस्य मत्वातेषां एवमौपदेशिकं मापिंड्यमुक्तं॥आमि
देशिकमादस्मुमंतु॥पितृपत्न्यः सर्वामातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्तद्दुहितरश्च भगिन्यस्त
दपत्यानि भागिनेयान्यन्यथासंकरकारिणी इति॥तद्दुहितरइत्यत्र तच्छब्दपरामृष्टयोः सपत्नमातुलयोः
ग्रहणं॥पुत्राद्यपत्यालक्षणे दुहितृपदेन॥अत्र सपत्नमातामहकुले चतुर्थविधिकमेकं मापिंड्यमतिदिश्य
ते॥न पुनः प्रत्येकं मातुलादिषु तद्बोध्यते॥उद्देश्यभेदाद्वाक्यभेदापत्तेः॥तस्मादापिंड्यप्रवर्तकौ मूलपुरुषउ
पात्तं च संततित्रयमित्येवं चतुष्टयमेवात्तेन ततः प्राक्तनं रूपं चमाद्य॥निमपंचितिवैतत्सरमकुरुते निर्देतनि ८२
र्णयेप्रमत्तया ज्ञवन्नयवेवे॥मारव्याम नुसरामः॥तत्रयवीयसीं वयसा प्रमाणेन चन्द्रेण ना॥तदाह मनुस्त्रिंश

द्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं॥त्र्यष्टवर्षोष्टवर्षां वा धर्मे सीदति सत्वरः॥बृहस्पतिः॥त्रिंशद्वर्षो दशा
ब्दां तु भार्यां विंदेत नग्निकां॥एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात्॥वसिष्ठः॥वर्षैस्त्रिभिरृतुमतीं नायमिष्टदेहच्छिद्र
णः स्वयं नग्निकास्वरूपमुक्तं वायवीये॥यावत्तु लज्जया याति कन्या पुरुषसन्निधौ॥योन्यादीन्नावगूहेत तावद्
भवति नग्निकेति॥स्मृतिपालरत्नमरकोषेन नग्निकानागतार्त्तवेति॥आरोगिणीमविक्लिन्नां नायराज्ययत्नमादिशेत्
दीनांत्रात्मतं॥पुत्रिकाकरणशंकानिवृत्तये॥अनेनापरिभाषितापि पुत्रिका भवतीतिगम्यते॥तदाह मनुः
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता॥नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशंकया॥पिता पुत्रिकाकरणानि
च्छयवाद्भवेदिनस्यपतस्रुधौ॥अनेनयत्रपुत्रिकाकरणाभावनिश्चयस्तामभ्रातृकामपिनोद्वहेतेति॥अ
समानार्षगोत्रजां॥आर्षं प्रवरः॥गोत्रलक्षणं वक्ष्यते॥इयं कृष्णपक्षवासिगोत्रेयेनिषिद्धं॥तेनासमानप्रवराम्

समानगोत्रामिति। तदाह गौतमः॥ असमानप्रवरैर्विवाह इति। मनुरपि। असपिंडा च या मातुरसगोत्रा च या
पितुरिति। असपिंडामिति बहुव्रीहिसमासबलात् पर्युदासोप्ययं निषेधतुल्यफलः। सगोत्रासप्रवरोद्वाहे प्रा
यश्चित्ताम्नानात्। अत्र चासपिंडामित्यनेन पितृबंधुसमानत्वमस्त्रादिर्हितुरसमानार्षगोत्राया अपि निषे
धः। तथा च समानार्षजामित्यनेन यमांवा तद्व्यपालवाभ्रूलमौनमौकादीनां भिन्नगोत्राणामपि नार्गव
वेतद्व्यसावेनमेत्रिप्रवरैक्यं तत्र विवाहप्रतिषेधः। एवं वध्र्यविस्योराष्टिषेणेन सहासगोत्रयोरपि समप्रवर
योर्विवाहः प्रतिषिध्यते। असमानगोत्रमित्यनेन तु संकृतिपूतिमाषतंडिशंबुशैवगवानां संकृती नामांगि
रसांबरीषयौवनाश्वेति मांधात्रांबरीषयौवनाश्वेति प्रवरविकल्पाद्धन्योन्यसमानप्रवरत्वमपि सगोत्रा ८२
णां विवाहः प्रतिषिध्यते। एवं नरद्वाजकपिगर्गरौद्रायणानां नरद्वाजानां कपिरांगिरस आमहीयव औरु

क्षयसेति त्रिप्रवरः। इतरेषां आंगिरसबार्हस्पत्यभारद्वाजेति त्रिप्रवरास्तेषां कपीनां मह्यासमानप्रवराणामपि स
गोत्राणां विवाहनिषेधः। अत्र कपिगोत्रे नरद्वाजमक्षिलत्वमयात्रायैकस्योत्पादकत्वरूपसत्त्वया तु हस्ता नर
द्वाजादित्रिष्वपि सगोत्रत्वावश्यंतत्र नष्टप्रगाववसरे न वा आंगिरसकप्रवरसाम्यात्समानप्रवरत्वेऽपि कः। पंचानां
त्रिषु सामान्याद्विवाहनिषेधः। न्यंगिरोगणेऽपि वमित्युक्तेः। यत्तु मदनप्रयोगपारिजातयोः। हरितादीनां
संकृत्यादित्रिप्रवराणामपि सगोत्राणां निषेधार्थमसमानगोत्रामित्युक्तमिति। तन्न। तत्र सगोत्रत्वस्य वक्ष्ये
षु आंगिरसयौवनाश्वद्यानुवृत्त्यासप्रवरत्वस्यापि वक्ष्यमाणत्वात्। यदपि तयोरेवोत्तरत्र। आंगिरसमांधा
नप्रवरत्वेऽपि प्रवरेषु एकयौवनाश्वानुवृत्त्या तदेकं गोत्रमिति सगोत्रत्वेनोक्तं। तच्चन्न। हरितादीनां केवलत्र्यं
गिरसत्वेन तत्प्रवरेष्वेकानुवृत्त्या सगोत्रत्वेनविवक्ष्यमाणत्वात्। अथापि तदभ्युपगमे वक्तुमविद्योपस्किमि

सं०म०८३

त्रपुवैन्यशुनकानां वाष्टिषेणेन सगोत्रतापद्येत नागविप्रवरानुवृत्तेः॥ एवं वयं तयोरेव इव्वत्रए कउवकशियिदि
सत्र सर्वेषां समतेत्सगोत्रलक्षणे सगोत्रत्वमिति स्य समानप्रवरत्वमित्यर्थ इत्युक्तं। तच्च न। स्मृत्यर्थसारादि
ष्वेतस्य सगोत्रलक्षणत्वमुक्त्वा प्रवरत्वस्य लक्षणांतरोक्तेः॥ यदपि तत्रैव समानगोत्रामित्येतद्विषयस्य
स्त्रोक्तिस्य इत्यादेर्नित्रगोत्रत्वमांगिरसगौरवात सांकृत्येति प्रवरैकांवा त्वकाः समानार्षजामित्येतद्विषयत्व
मुक्तं। तच्च न संकृत्यादीनां कात्यायनेन प्रसिद्ध्यामुष्यायणे शैशगंशैशिरिनिःमत्स्यादात्मक विश्ववसिष्ठमधि
कृत्यात्मानान्नस्यैकस्य सर्वत्रोत्साहकरूपत्वत्वयानुवृत्तसामगोत्रत्वस्यैव वक्ष्यमाणत्वेन नित्रगोत्रत्वानावाद ८३
गोत्रलक्षणत्वं प्रवरत्वं॥ प्रतिवन्यारव्यास्यामः॥ उपक्रमकस्पते गोत्राणीतिवचनादित्तिसत्याषाढस्त्रत्रस्य
व्याख्यानार्थे आचार्यवचनात्मवारोगोत्राणां गणव्यवस्था समानतादेतिज्ञा वरस्वापि भाष्ये गोत्रस्य स्वरूप

मान्याज्यांज्ञाने प्रवराणां हेतुत्वोक्तेः। अतश्च यमखिलत्वप्रवराम्नानं सगोत्रं। तस्यैव वयेच्छानुवृत्ताख्यं साम्यं
तेसगोत्रा इति। गोत्रज्ञा ह्यर्थनिर्वचनं चाद्युज्ञाद्ग्रा वरस्वाम॥ गोत्रज्ञाद्ये नुष्टेयपदार्थस्यैकत्वापादको पाधिक
चनोत्तिप्रेतइनिपक्षु। समानाम्नाबाणामगस्त्याष्टमानां पदंयस्य तत्सगोत्रमित्यावक्षन् इति। बौधायनीयं। गो
त्रलक्षणे वेसुनयमप्येतत्परमेव॥ तत्रगोत्रत्वव्याख्यात्वा सगोत्रत्वस्य तल्लक्षणमेवतावदेवंव्याख्येयं। तत्र
कएवेत्यनेन प्राकरणिको यः कश्चिदेको गृह्यते। ननु समस्तवर्ग्यैरते एव। तथा वत्सएवेवस्त्य गोत्रत्वस्यात्रान्य
त्र केवलत्र्यंगिरः प्रनत्तिषु॥ किंच। जातेष्वंगिरसांगिरगादिति पर्युदासानुपपत्तिः। त्र्यंगिरसैः प्राप्यत्वाव
दः। प्रवरैष्विति लुप्तापि कं। न पुनर्नियमार्थी तथा सांतिकपिगोत्रे प्रवरे धैकस्य भरद्वाजस्यानुवृत्त्यभावात्। व
क्ष्यमाण भरद्वाजादिनिःसगोत्रता न स्यात्। एवं संकृत्यादीनामपि वक्ष्यमाणैव कास्यिक प्रवरे कुपत्रैकर्ष्यनुवृ

च्यते तत्प्रवरवत्तामेव पराशरैः सह सगोत्रत्वस्यानन्वेकानुवृत्तिमत्प्रवरतामपि। एवमित्रयुवामप्यन्यो
न्यं। तत्रापि प्रवरविकल्पस्य वक्ष्यमाणत्वात्। न च नास्त्वेतेषु सगोत्रत्वं कादाचित्के कस्यचिदनुवृत्तिमत्त्वेन सप्रव
त्वमेवास्त्विति वाच्यं। तथा च स्मृत्युक्तिः पृथक्सगोत्रापर्युदासो निर्विषय एव स्यात्। न ह्येवंविधविषयक एव सन
वतीति। न च व्यत्रगोत्रेकोपि वैकल्पिकप्रवरत्वेन तदुदाहरितादिषु तत्परः पर्युदास इति वाच्यं। अत्रत्यागा
त्रत्वस्यैव सप्रवरत्वस्याप्युपपादयिष्यमाणत्वात्। तस्मात्प्रवरैक्यत्वस्य प्रायिकत्वेनोपलक्षणत्वाद्यथासं
नवमेकानुवृत्तिः सगोत्रत्वसंपादिकेत्याख्येयं। अनुवर्तनं तु द्विविधमुक्तं। क्रियमाणतया वा पृथक्तया वा
नुवर्तनमिति। तत्र द्वितीयमामादः प्राक्तनदनधिकारिणो वा तदंगभूतो वारणविशेषरूपस्य विपर्ययेणानुवर्त्य ८४
संतनवाद्वारणसामान्यपरमेव तदिति। सत्त्वात्सलायोसादकत्वाव॥ नूमत्त्वयामितिस्मरणात्। समानगोत्रत्व

मित्यत्र समानं वत्सगोत्रं चेति कर्मधारयः समानं गोत्रं येषामिति बहुव्रीहिर्वेत्युभयस्मिन्नप्यस्तथापि सद
स्यमः संज्ञामामित्यता। सादेशस्य वोपसर्जनस्येत्यतन्त्वोपसर्जनस्येति छा। निविशेषणस्य समान
स्य छंदस्यमृद्धप्रत्युदर्कैर्थिस तत्र समानस्येति स्यान्निश्चानुवृत्तौ ज्यानिर्जनपदराज्ञिनातिनाम
गोत्ररूपस्थानवर्णवयोवचनबंधुष्विति सूत्रेणोपसर्जनीभूतसमानशब्दस्य सादेशान्वाख्यानेन स
नाभ्यादिवत्सगोत्रशब्दव्युत्पादनात्। बहुव्रीहिरेव युक्तो न कर्मधारय इति। रुतेनांगिरसां गणादिष्व
त्र नांगिरसः शाखान्यां तस्मात्स्यैव ग्रहणं। न तु तथाप्यपृथ्विगुदहरितादेरपि। तथा न तत्र व्याप्यत्वाविशे
षाज्जमदग्न्यादेरपि ग्रहणात्तदनुवृत्तिमत्त्वं सगोत्रत्वया हृत्स्यं पिपर्युदासस्यादिति तदत्राप्यमर्थः
मपत्रः। नांगिरेमात्रनिश्चेगस्याष्टमसप्रवर्ण्यतरान्यो वाच्यः कश्चिदेकोगोत्रप्रवराध्यायाधीतः आयः

प्रवरेषु स्मार्यमाणतयाक्षविष्णुकपाद्यावुलादेः कलरूपमन्त्रपाठानुवृत्तेः सगोत्रत्वप्रयोजक इति। न
दैवं न त्वंगिरोनित्येषु सप्तर्ष्यपत्येषु। अन्येषु च केवलत्वंगिरस्सु हरितकुत्सादिषु सगोत्रत्वसिद्धे
स्तथापकं गोत्रत्वमपि सिध्यति। अतो बौधायनीयगोत्रलक्षणे ऽगस्त्याष्टमसप्तर्ष्यपत्यं गोत्रमिति यदुक्तं
तत्प्रदर्शनमात्रं न परिसंख्यार्थं। प्रवरमंजर्यां तु अगस्त्याष्टमसप्तर्ष्यपत्यस्यैव गोत्रत्वोक्तेस्तल्लक्षणे एवे
कएवेत्यनेनैकर्ष्यनुवृत्त्यामगोत्रत्वमुच्यते। अन्यत्र त्वंगिरसां गणादिति जमदग्न्याद्यतिरिक्तकेवलत्व
ङ्गिरोविषयं। तेषामसप्तर्ष्यपत्यत्वादगोत्रत्वेन तथाप्यसगोत्रत्वानापातेः। जमदग्न्यादीनां तु त्वंगि
रोविषयेरसत्वेपि सप्तर्ष्यपत्यत्वस्यापि सत्वात् गोत्रत्वेन सगोत्रत्वात्तेन द्वित्रयमपि। अनुमेवार्थं बौधा ८५
यनोप्यस्मात् त्वंगिरसोनित्रविवाहं कुर्वते न वेत्समानार्षेयावदद्वयंस्युरिति। आर्षेयसंनिपातेविवा

हस्त्वार्षेयाणां आर्षेयसंनिपाते ऽविवाहः पंचार्षेयाणामिति त्रिषु त्रीं केवलत्वंगिरोविषयानुक्तोपरिष्टा
च वक्षाविदा आर्ष्टिषेणाः उ स ते तेषामविवाहः गोतमानां सर्वेषामविवाहः। भरद्वाजानां सर्वेषामविवाह इति
त्रिषु त्रीं जमदग्न्यादिविषयां प्रदर्श्य च्युक्तमेवादष्टुक्तं॥ मित्रविवाहसिद्ध्यर्थं तत्रैव। केवलत्वंगवांगिरस
स्तु गुत्वादिना। मित्रा अपि स्वस्वगणे द्विवागणांतरायैस्तु मिरेवत्ति च वदग्न्यादिवद्विवाहं कुर्वते। मित्रं
सं वा विलक्षणं वा विवाहं कुर्वते। अतित्रेत्विवाछेदः। अमित्राणां विवाहोमित्तविवाह इति। एवं वैषामपसप्तर्ष्य
न्यतरत्वादगोत्रत्वेना सगोत्रत्वात् समानप्रवरत्वात् मिथो विवाहे न दोषः। एतच्च न वे अनार्षेयावदद्वयं स्युरि
त्यनेनापोद्यते। न द्विवरणार्थं व्यार्षेयत्वादिसंनिपातसाम्यमिति। अस्यां च व्याख्यायां केवलत्वंगिर
सां गोत्रत्वेन प्रसिद्धानां हरितकुत्सादीनां नगोत्रं सगोत्रते इत्येतद्विरुध्यते। किंच। एकएवेत्यस्यावदि

सं०म०८६

नपरामर्शेसिमव्यन्यतरस्यैवानुवृत्त्यासगोत्रत्वेत्यर्थसिद्धेःकेवलभृग्वंगिरोभिन्नेष्वेवप्रवृत्तेः।अतोभृग्वंगि
रसांगणादितिपर्युदासोनोपपद्यते।वस्तुतस्तुसावैयदेव्यामिश्रेतिवदनवद्वितपरामर्शकितच्छद्यात्रा
वादगस्याष्टममध्यगणामत्यवधानेपिएकएवेत्यनेनतन्मात्रपरामर्शएवानुपपन्नः।अतवैकएवे
त्यादेर्भृग्वंगिरोभिन्नसगोत्रानुवृत्त्यासगोत्रत्वेत्यर्थात्पर्युदासोपपत्तिरितिवाच्यः।प्रकृतत्रैवाभृग्वंगिरसो
भिन्नविवाहनिषेधादेःकेवलभृग्वंगिरोविषयत्वमुक्तंतन्नमन्यामहे।तस्यशाब्दवृत्त्यासामान्यतःसर्वभृग्वंगि
रोविषयत्वेनप्रवृत्तत्र्यज्जामदग्न्यादित्रिषुसगोत्रत्वपरिभाषयाविवाहनिषेधेनापवादात्फलतःकेवल
भृग्वंगिरोविषयत्वौचित्यात्।आर्षेयसादेस्तुनद्विषयत्वंनमन्यामहे।तस्यशब्दतोवैसामान्यतःप्रवृ ८६
त्तस्यापवादाभावात्सर्वभृग्वंगिरोविषयत्वस्यैवौचित्यात्।अन्यथाजामदग्न्यादिष्वत्र्यादिष्वांगिरस्सु

त्र्यैकप्रवरसाम्येनापिविवाहनिषेधप्रसक्त्यागोतमानांभरद्वाजैःसहैष्टोविवाहोनस्यात्।अवछेद्यर्थकमि
तिकरणेमध्येपठितःसूत्रकारस्यतयोर्भिन्नविषयत्वमेवाभिप्रेतमितिसूच्यते।अतएवसंग्रहवाक्येपिभृ
ग्वंगिरोगणेद्वयोरितिसामान्यतएवोक्तं।तदात्रिपंचार्षेयभृग्वंगिरोविषयेद्व्यार्षेयसन्निपातएवाविवा
विवाहदृत्यादेनियमेनैकार्षेयसाम्यमेवव्यावर्त्तते।तत्त्रिपंचार्षेयसाम्यमपिद्वित्रिप्रवरसाम्यसत्वेनानि
षिध्यमिष्यते।तेनपञ्चगणादिषुप्रवरत्रयस्यापिसाम्येतत्रद्वयोःयत्रवावत्साष्टिंषेणादिषुप्रवरपंचकस्या
पिसाम्येतत्रत्रयाणांसाम्यसत्वात्प्रवरत्वमस्त्येव।वत्समत्यादिषुत्रिप्रवरसाम्येप्येकसाम्यसत्वादिति।
तदेतदार्षेयेत्यादिप्रवरत्वलक्षणमितिबोध्यं।अतएवसमानमुनिरूपत्वमेकप्रवरतामपि।समा
नप्रवरत्वंनद्वैधबोधयतोनप्रवरादित्युक्तम्प्रत्यर्थसारे।तत्रप्रवराआपिगोत्रभूतानामेववंशाः।केचित्तु

नयः तथावमाऽस्ये। पौलोम्यज नयद्विभाद्वानां तु कनायस्तः। एवं नं नु महाभाग मामवानं तथाप्यमौ। अन
वानात्मजश्चौर्वेजमदग्निस्तदात्मज इति पौलोमा। नृगोनयिलिथावेस्तवेपिनरक्षाज्ञानो प्रवरर्षयः पराशरे
णोपदिष्टा वंशानुरूपा। तत्र प्रथमोंऽगिरास्ततो बृहस्पतिस्ततो भरद्वाजस्ततश्चामहग्न्यस्ततउरुक्षयस्त
तः कपिरुस्य इति। एतेषां च श्रौतस्मार्तकर्मसु संकीर्तने क्रमविशेष उक्तो बौधायनेन। अथातउक्ष्यनि
र्धूर्तुर्धूर्गति अमुतोवविदोहे तेस्वेष एव सर्वत्रोद्दि चाइति। अस्यार्थः। अतोऽस्माद्यजमानाद्दर्शनेरोद्देणावृक्षि
नर्पुद्रणिते। होतातु अमुतोपज्ञमानविप्रछठ्याक्रवादितः प्रन्नस्यवैविवरोद्देणवृणीतेति। तत्रापि होतुस्त
द्दितात्मसंबुध्यं तनयावरणं। अध्वर्योश्च तद्दितानवसंततया। तथा च बौधायनेन वसादिगणाननुक्त्वा
न्नार्गवच्यावनाप्नवानौर्वजामदग्न्येति हे। ताउमग्निवद्दुवेदप्रवानवतव्यवनवद्भृगुवदित्यधूर्तुरितिप्रयो

गनियमनात्। कातीयाध्वर्योस्तु होतृवदेव संकीर्तनं। दार्शपौर्णमासिकप्रकरणाधीतेन परस्मादर्वाचि
कानीयस्त्रयेणहोतृक्रमविधानात्। अत एव तद्विरुद्धं प्रागुक्तं बौधायनीयं तदपि केकिलापनीयं च विह
तिपरं। प्रकरणानुविहितो विरोधि स्यादिति नातः यन्यायावएवइत्यादि। अत्रैतच्छेनाव्यवृदितो होतृ
क्रमएवापराम्रुस्यते न व्यवहितोऽध्वर्युक्रमः। सर्वत्रिकन्यादानञ्च तिग्वरणादौ। एतच्च दार्शपौर्णमासिकप्रक
रणाधीतमपि नतेन नियम्यते। परिभाषारूपत्वादस्यप्रवरमंजर्यामेषः एव प्रवरक्रमविशेषो होतु
रध्वर्योश्चाध्वमयपरिसमाप्तेः सर्वत्रोद्देष्टव्य इति प्रकरणाबौधेनास्य व्याख्यानं। तदसांप्रदायिकं। बौधाय
नेनैव हौत्रे कृते सामान्योपदेशात्स्वसूत्रयं तत्र कांडशेषे विशेषतोपि प्रवरक्रमस्योपदेशप्रमाणत्वे
नाप्यानुदाहमा च तया प्रवृत्तिविशेषकारित्वादानर्थक्यापत्तेः। इदं व्याख्यानं तु यत्र प्रवरकीर्तनं वि

द्वितं क्रमविशेषस्तेनोक्तस्तत्र प्रवरक्रमविशेषनियामकत्वेन हन्ति विशेषकारित्वोऽसार्थक्यं एवं च सर्व
स्मार्तकर्मसु होतृक्रममेवानुसरतां शिष्टानामाचारोप्यनुगृहीतो भवति अत्र बाधः यतोऽक्तेन पंचावश
द्गणानां वरीतव्यत्वेनाम्नातात्तन पंचावास्त्ववरात्मेयाः तद्यथा भृगूणां सभृगणाः तत्र द्वौ जामदग्न्यौ। व
त्सा णो विदगणश्च। पंचार्षेयाः जामदग्न्याः आर्ष्टिषेणा यस्कामित्रयुवो वैन्याः शुनकाश्चेति ॥७॥ अंगिरसांस
प्तदशा तत्र गौतमांगिरसां सप्त। आयास्याश्चारद्वंता कौमंडदार्यतिमस्ताः कारेणुपालयो वामदेवा औश
नसाश्चेति। भरद्वाजांगिरसश्चत्वारः भरद्वाजा रौक्षायणा गर्गाः कपय इति। केवलांगिरसां षट् च। विष्णु ८८
वृद्धाः कण्वा हरिता रथीतरा मुद्गलाश्चेति। संकृतयो ह्यांगिरसा एके अत्रे चत्वारः। आद्या त्रयो वाद्भूतकाः
गविष्ठिरा मुद्गलाश्चेति ॥४॥ कश्यपानां त्रयः। निध्रुवा रेभाः शांडिल्याश्चेति ॥२॥ लौगाक्षयोपि काश्यपा इत्येके वसि

ष्ठानां चत्वारः। आद्या वसिष्ठाः कुंडिना उपमन्यवः पराशराश्चेति। विश्वामित्राणां दश। कुशिका रौहिता रौ
क्षकाः कामकायना धनंजयाः कताः अजा अघमर्षणाः पूरणाः इंद्रकौशिका इति ॥१०॥ अगस्त्यास्त्रयः।
इध्मवाहाः सांभवाहाः सोमवाहा इत्येते प्रत्येकं समावांतरभेदाः प्रवेवैसराः प्रोक्ता बौधायनेन। तद्यथा। भृ
गूणामादितो व्याख्यास्यामो मार्कंडेया मांडव्या मांडूकेयाः काश्याः कामयः आरवनाहा नापिणा वाकरिका
हैवतायनाः शौनकायना माण्डूकेयाः पार्ष्णिकाः कौत्साः भाजायनाः पैलाः पैंगलायना हः प्रेषयो वा सक
कपो वैश्वानरयो वैहानरयो विरोहितावा भागौ ब्रायणाः ष्टैकायकाः शाः सभ्रा वाद्भूतकाः लननागारेणि
शायनाः शानयनाः पाणिनिवल्मीकिः स्थौलपिंडय मैथातवाडिदान्ताः मार्वर्णिकायना वाललायनाः सौ
जनयो मंडविश्वा विम्तयो हस्यनयो हस्तागन्याः शौद्राकयः सोद्धाकयः शौद्धाकयो वैकर्णयो द्रोणजिह्व

औरमयः कांबरोदरयः कंटोरऋद्दैद्गालिविरूपाक्षाहृकान्वाउच्चैर्मन्यिवोदैमसाञ्चायविणमाकयिणा
काक्षायनाः वायवाः दैवमत्याः आर्कयेणुः कांकायनाः वायानिनः शांकरवः चांद्रमसाः गांगेयाः नोपेयाः
पाद्वियापावनिः वाकुमित्रायणाः आपिशालयो वैष्टपुरेयाः लोहितायनाः उषुक्षाः मालायनाः शा
रद्वतायनाः राज्जितवाहाः वामाः वाल्यायनाः इत्येते वत्साः पंचार्षेयाः भार्गवच्यावनाप्नवानौर्वजामदग्न्येति।
विदाः शौलाश्ववराः शैलाः प्राचीनयोग्याः अनपदानाः कांडरथयो वैतमृत्ताः पुलस्त्यः आकयिणाः तां
त्रायणाः कामलाः इत्येते विदाः पंचार्षेयाः भार्गवच्यावनाप्नवानौर्वबैदेति। आर्ष्टिषेणा नैरययो श्राम्या
यणयः कात्यायनाश्वांड्रायणाः पौटकनायनाः सिद्धान्तुमनायनाः गौरांनिरान्निरित्येते आर्ष्टिषेणाः पं ८९
चार्षेयाः भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति। दक्षोमोनोनृकावाधूलौवर्णपुष्योमापोराजतैनोद
दिनोनास्करो दैवलायनो जैवलापनो वाकलयो माध्यमैयावासयः कौशांबेयाः कौटिल्याः सात्यकेयाः
कौबिल्याः सत्यकयः वित्रसेनाः नागंतपः ताकम्बिकेयाः औक्षाः औग्रविनयः नागुरिः इत्येते यस्काः
त्र्यार्षेयाः भार्गवदिवेनहव्यसावेतमेति। मित्रयुवो रौक्षायणनाः शावर्जिनाः रोध्यायनाः रौक्षायनाः सा
वर्णिनां मुरचिलेयाः मान्यायाः वाल्यायाः महावाल्याः ताम्रोपरगाः औरक्षायणाः वाञायनाः इन्द्रायणाः माजाध
यः कैतवायनाः इत्येते मित्रयुवः आर्षेयाः भार्गववाध्र्यश्वदैवोदासेति। वैन्याः पार्थविाष्कलाः आर्षेयाः भा
र्गववैन्यपार्थेति। शुनकाः गार्त्समदायनाः पयः सौगंध्ययः रवार्दमायनाः गांगायनाः मस्यगंधगार्त्सपिनाः श्रो
त्रियास्तैत्तिरीयाः इत्येते शुनकाः एकार्षेयाः शौनकेपि। गार्त्समदेति वा। अत्र वत्सादीनां त्रयाणां गोत्रे क्याश्र
वरैक्यायायान्योन्यम विवाहः। तत्र वत्सानां जमदग्न्येर्जियिमागणतयानु दृष्टेर्विदानां सत्तयानुदृष्टे गत्विकं।

सं०म०

आर्ष्टिषेणानां तु प्रवरैक्येनैव न गोत्रैक्यं। उभयथापि जमदग्नेरनुवृत्त्यभावात्। यस्कादीनां तु चतु
र्णामन्योन्यं वध्र्यादित्रित्रिभिर्वक्ष्यमाणैश्च सह विवाहोऽस्ति। उभयथाप्येकस्यानुवृत्तस्याभावेन गोत्रैक्या
भावात्। नार्ष्टिषेणैकप्रवरैकोपि द्वितीयप्रवरैक्याभावेन समप्रवरत्वाभावात्। एवं तु गुणलो निर्णीतः।
अथांगिरोगणः। तत्रोद्दिष्टक्रमेण प्रथमं गौतमांगिरसस्तावत्प्रदर्श्यन्ते। आयास्या औशिजेया मूढदुक्थ्याः
वाह्यपास्वैदेहाः कौमारवत्स्यास्तांडिदान्तिं देवकिः मात्समुग्धिः कौवाक्षावौत्यानैकरूहिस्तैषकिः। ग
लयः काकणिः कदोरिः काशीवाकाहीवाः इत्यायास्यास्य आर्षेयाः आंगिरसायास्यगौतमेति। शरद्वंतः
अभिजितो रौहिण्याः क्षीरकरंभाः सौमुचयाः सौयामुनाः कौपविंदवैराहगणाः गणश्योमव्या इति ९०
शरद्वंतस्य आर्षेयाः आंगिरसगौतमशारद्वतेति। कौमंडमानंतरेषणानामुराक्षाः काष्टरेषयः आंडाय

नावंजायना इति कौमंडाः पंचार्षेयाः आंगिरसौचथ्यकाक्षीवतगौतमकौमंडेति। दीर्घतमसामिति द्वापंचार्षे
याः आंगिरसौचथ्यकाक्षीवगौतमैलदैर्घतमसेति। कारेणुपालयो वास्तव्याश्चेतायापौंडिष्टाः औदलाय
नार्म्रधुद्वाराश्चजुर्गंधय इति कारेणुपालयस्य आर्षेयाः आंगिरसगौतमकारेणुपालेति। वामदेवा ति वैदा आ
र्षेयाः आंगिरसगौतमवामदेवेति। औशनसाः दिश्याः प्रशस्ताः गुरुरूपाः क्षामदोदरवर्करूताः मुदुभमनिरूता
इत्यौशनसस्य आर्षेयाः आंगिरसगौतमऔशनसेति। अत्र समस्तायास्यादीनां गौतमापत्यत्वेन सगोत्रत्वात् आ
र्षेयाणामन्योन्यं पंचार्षेयाणां च सह त्रिषु आंगिरसगौतमेति प्रवरद्वयानुवृत्ताः पंचस्वांगिरसौचथ्यकाक्षी
वतगौतमेति प्रवरचतुष्टयानुवृत्तासमप्रवरत्वाच्चाविवाहः। इति गौतमांगिरसः॥ अथोद्दिष्टक्रमेण बलारो
भरद्वाजांगिरसमध्यं ते। भरद्वाजाः क्षाम्यायणामगडादेवाश्वाडहृह्याः भार्गवंशयः वाहलनावाद्योगावमाना

यनास्मैदेहाः आत्राः औद्गाचूरयः परिणद्धेयाः केदाश्चेपाः शौद्रयः उद्दालकाः रिश्रीवयः औपमयाः वपोष्ठिनेदा
अग्निवेश्याः ब्रयाः ज्ञाराशौरिवायनाः स्तनकर्णाः हिरण्याक्षाः माणिर्मिधाः कह्योदकाः स्तोज्ज्वल्ययौवैल्लारवाः हरुडादेव
योनाः कंड्योज्ञाउपघयाः मौरनराः मुंगादेवमतयः इक्षुमताः औदमेघयाः भवाह्णेयाः कुल्माषाराजस्तंबिनि
मुधायनाः नाबाराहयाः बलनोकयः हस्तांगयथाः शाल्वादल्वयाः वेदवेलाः नृत्यायनाः शालालयशार्हलियशा
कलाबाधकलाः स्वैधकेशाः कौंडायनाः कौंडिल्याः ब्रह्मस्तंबाः राजस्तंबाः अग्निस्तंबाः वायुस्तंबाः सूर्यस्तंबाः नामो
मस्तंबाः विष्णुस्तंबाः यमस्तंबाः इंद्रस्तंबाः आपस्तंबाः येवान्ये स्तंबशब्दाः चारणाः सिंधुकोनुहगंधयः शिवाय
नाः आत्रेयायणाः नामाणाः कुशांकौकचियोनैतुंतयोदानयाः श्यामेयामदयकायाः कारुणायनाः कारूप ८९
थयः कारिषायणाः कांबल्याः इति तरयाडाः त्र्यार्षेयाः आंगिरसबार्हस्पत्यभारद्वाजेति रौक्षायणाः कपिलाः

शिफिलाः शैफिलावैकिशाः कौघुमोग्निहि हावकणिश्वहूतिश्वैतिरौक्षायणाः पंचार्षेयाः आंगिरसबार्हस्पत्य
भारद्वाजवांदनमातवचसेति। गर्गाः शिनीनरायणाः सांख्यनायनाः गंधरायणाः वालुकयो ताक्ष्णकाः क्रोष्टु
विंदवः क्रोष्टुकयः सोयामानिः वाजिनाह्वयः होत्रापवपाः सत्यापवपाः जवाः नवपन्नाशाः शारवावतयः संप्रद
कुल्याः वेणुनिरिः सोद्भकारिरौतिकौंवाल्याः राजवस्तोल्लवाइति गर्गाः पंचार्षेयाः आंगिरसबार्हस्पत्यभारद्वा
जगार्ग्यसैन्येति। कपयः वैतलायनाः पतंजलाः नोतराविनां नौउर्नाः भोजसानां सांगरवाणां रवरात्रिरवंडिनामो
चितकिः सज्ञायापौष्ययमैतिशायनाः इति कपयस्त्र्यार्षेयाः आंगिरसआमहीयवऔरुक्षयसेति। अत्र भरद्वा
जाहानांबलु णांनिरद्वाजस्यैकस्यो सादकत्वेनानुवृत्या सगोत्रत्वात्कपिनितानामांगिरसबार्हस्पत्यभारद्वाजे
तित्र्यार्षेप्रसाम्येन समप्रवरत्वाच्चान्योन्यमविवाहः इत्युक्ताभरद्वाजांगिरसाः। अथोद्दिष्टक्रमेण केवलांगिर

सं०प्र०९२

मउच्यंते विष्णुवृद्धाः शठमर्षणाः भद्रणाः बादरायणाः मांत्र्यप्रायणाः मात्यकिः मामकायनाः नैतुधाः स्क-
त्याः नारूण्या वै होता देवस्थातय इति विष्णुवृद्धाः आर्षेया आंगिरसपौरकुत्सत्रासदस्य वेति। करवा औपम-
न्याः दापनाबाष्कलायो लाग्हलितो मात्रिमाज्याः मौद्गिगंधविद्भिवाज्य यावाजश्रवस इति करवा आर्षेया
आंगिरसाद्ध मादकाण्वेति। हरिताः कौत्सः सांख्याः दाच्यो मैम्यो नैमगवो मलायुर्लंबी दर्भो बलो दर्भ महोदरा नै-
मिश्रेहाना मिश्रयाः कौत्स्याः काराष्ययः कौलयाः पौलयाः पौडलो नामाधूपमांथतत्साउ कारय इति हरिताः स्व आ-
र्षेया आंगिरसांबरीषयौवनाश्वेति। रथीतराः हास्तिदासिकाः नायनाः नैतिरक्षपर्णशालयाः कौलालयमैत्रेति
लानायनाः मावस्थाः नैरुवाहाः देनगवाः इति रथीतरास्त्र आर्षेया आंगिरस वैरूपराथीतरेति। मुद्गला हि- ५२
रण्याक्षाः तरुक्षाः कृषनामिनाः कृयासस्याः हरुमायणाः दार्घमंयाः प्रलअंघात्तरणार्निदव इति मुद्गला

स्त्र आर्षेया आंगिरसभार्म्यश्वमौद्गल्येति। अत्र पंच विष्णुवृद्धादि केवलांगिरसामेकापत्यत्वान्नावेनसगोत्रत्वा-
न्नावांगिरसत्वे एकप्रवरसाम्येपि द्वितीयप्रवरसाम्यात्तावेनसप्रवरत्वान्नावाच्चान्योन्यां न भवति विवाहः
त्वेस्वेगणे तु सगोत्रसप्रवरत्वान्न्यांनविवाहः। इति केवलांगिरसः। अथैते द्व्यामुष्यायणाः संकृतपक्ष्यंते।
संकृतयो मल्लकाः पौलास्तंडिशांबुत्रौवगवाः परिवाससारकाय्या हारिश्रीवाऐतरेयाः बेणायाः वाराय-
णाः आश्वलायनाः श्रौतायनाः आत्रायणाः आपस्तिवचांद्रायणाः आमापयाः इति माषाः इति संकृतयस्त्र आ-
र्षेयाः आंगिरससांकृत्यगौरवीतेति। अत्र संकृतीनामंगिरोगणे तु वाशिष्ठेषु वपादान्प्रवरेषु च वसिष्ठवंश्य-
स्यत्राकेरांगिरसस्य प्रवरणाद्व्यामुष्यायणानां वक्ष्यमाणरीत्या विधिवन्निष्ठैः स दै कस्यत्राके च वागिप स्वेक-
स्य संकृतेरुत्सादकतयानुवृत्त्या वृक्षे नृतांडहरैः सप्रवरत्वाच्चाविवाहः। इति संकृतयः। अथोदिष्टक्रमेण

चत्वारो त्र्यय उच्यंते। अत्रयो भूरयः छांदि छांदोगि पौष्टिका मौद्गलयः सेपाछराला छागला स्सुरणबिंदु नगितयः
मालरूचः व्यालयः मौजवायनाः सावब्रायनाः कामधीयाताः कार्मयित्स्यनयः दाक्षिः स्तेदेहा गाणपतयः औ
द्दालकिः द्रोणवावाः गौरग्रीवयोगाविष्टिशाः शिशुपालाः लक्ष्मात्रेयाः गौरात्रेयाः लणात्रेयाः अरुणात्रे
याः नीलात्रेयाः श्वेतात्रेयाः श्यामात्रेयाः महात्रेयाः स्वात्रेयाः दत्तात्रेयाः कालेयाः गालेयाः वालेयाः शौत्रे
याः वामरथ्यानावैतनावाः शौङ्ग्याः कौड्याः गोपवताः कालायः पचयाः आनीलायनाः आनोशायनाः आ
नंदीर्मनंदिगौरिरदिक्रौरंदिः मैरंदिर्हरिदि। पुष्यपत्रो फपन्मा केतापताः शाकलायनाः भारद्वाजनयः इत्याति
थिरित्यत्रयः आर्षेयाः आत्रेयार्चनानसमावास्येति। वाभूतकातिनैदास्त्रार्षेयाः आत्रेयार्चनानसवाभूत ९३
केति गविष्ठिरानिनेंदाः आत्रेयार्चनानसगाविष्ठिरेति। मुद्गलाव्यालिसंधिः अग्निवाबोधाद्रा वाजकिर्गवि

ष्ठिराः वेतवाहाः ष्ठिरायः शालिमताः भ्रोद्मिमताः गोरितो गौरवयो दायवनाः वाय्यलाइतिमुद्गलाः व्यार्षे
याः आत्रेयार्चनानसपौर्वातिथेति। अत्रैतेषां चतुर्णामिकस्यात्रेविपमाणत्वेनो स्याद कत्वेन वातुभूयास्त्रगो
त्रत्वादात्रेयार्चनानसप्रवरद्वयैव वाच्याविवाहः। इत्यत्रयः। अथोद्दिष्टक्रमेण त्रयः कश्यप उच्यंते। क
श्यपः ष्ठागिरपः लागलेया मटराष्ट्रे लिशायनाः आत्नूत्याः वैन्निरवा नूत्नाः धूम्रायणाः सौम्याः धम्यायिणाः
औदवृक्षिरायायणाः पैंधकपः भावर्यार्द्रुद्रोणाः आतपाः पांचायतिकाः मौषलकिः सगस्यमायसाः रा
वयः मैधवपः मापस्याः आसुरायणाः छागबाः सौमयाः स्थौलकेन्द्रायः वाढकपः औपव्यालक्षायणा
कौष्ठाजा वनयाः स्वाध्यायणाः रोहितापनाः मितकूनाः पिंगाक्षयः औउलपः मारयणाः पवयः वैकर्णयः कौ
षीतकेयाः धूमलक्ष्मणयः सुरगौरिवापनाः विमध्याः अग्निशर्मालायनाः औष्ट्रायनयः कांवोदरयः

सं॰म॰९४

देवराता वैदरा बावेला महावकेया पैठीनस्या पानस्या वृषगणा दाक्षमाणय चालंदना शांखमित्रे
या हरिमणाया वालालाजा रमण्योरमाणिसा विश्रवसो वैशंपायना स्वैरकि कौमलय उल्कायनि
मार्ललायना कौमलायना देवाहोता न्हवयं चदेनाय स्तूणा नागुरय पार्थिकाया गौपायना हि
रण्यया आग्निदेवि नथ्यशौर्या पुमला आविन्वेणा उत्तरतो गंडूषा दलामंत्रिता वैकर्णय स्थूल
बिंदव इति निध्रुवाः कश्यपा आर्षेया काश्यपावत्सारनैध्रुवेति रैभानिर्नैदा आर्षेया काश्यपाध
मारसैयेति। शांडिलाः कौहला पार्पका वार्यका औदमेघपा मोदानवामोपवमः कारेया कौकुदयनौ
शिकयोमाद्रकपव द्रोदकपा कौजयो मौजायना जाणा वंशा रवर्धमानया गांगायना वाक्षनालया गो ९५
निला वेदायना वाक्ष्यायना वकुदया नागुरि गार्दभिमुखा हिरण्यबाहिभ्ल्वे दहा गोमूत्रा वाकपश

टा जानध्रर जालंधरि धत्वंतरि रिति शांडिलाः आर्षेया काश्यपावत्सारशांडिल्येति। काश्यपावत्सारदैवले
तिवा। काश्यपावत्सारासितेतिवा। शांडिल्यासितदेवलेतिवा। काश्यपासितदैवलेतिवा। तदेतेषां त्र्यार्षेयाणं क
श्यपानामेकस्य कश्यपस्य ब्रियमाणतयोत्पादकतयावानुवृत्तस्य गोत्रैक्यात्मवरैक्याच्चान्योन्यमविवाह।
अथ शांडिलानां चतुर्थप्रवरविकल्पपक्षे कश्यपस्यैकस्योत्पादकतयैव गोत्रैक्यमात्रं। न तु समप्रवरत्व
मपीति विशेषः। इत्युक्ताः शुद्धाः कश्यपाः। अथ द्व्यामुष्यायणलौगाक्षिरूपकश्यपा उच्यंते। लौगाक्षिगणे
दार्भायणमैत्रावाक्रेय कालेय कायुरिस्तथा कलय कमपात्रस्थनालकायनि परस्ता विरोद किमौ
जामि मौनय सैनिकिधिनेरो नि छिषिकि सांभुकि ब्वैरउश्वि पर्णायो धकालंकपिञ्जो लौगाक्षयोवा
चपजवाइलिलौगाक्षय आर्षेया काश्यपावत्सारवासिष्ठेति। वासिष्ठावत्सारकाश्यपेतिवा। अ

त्र्यौगाद्धाणामेकस्यकश्यपस्यध्रियमाणतयोत्पादकतयाचानुवृत्तेःकश्यपैसहवसिष्ठैस्ववसिष्ठ
स्यध्रियमाणत्वेनानुवृत्तेःसगोत्रत्वात्समप्रवरत्वाच्चाविवाहः।इत्युक्ताद्यामुष्यायणगोत्रद्वयमाश्च
योद्दिष्टक्रमेणचत्वारोवसिष्ठाउच्यंते।वसिष्ठाःवैतलकिःवादरकिःसाश्वलागोरिंभसःआश्वलायनाः
कपिष्ठलःशौविहृद्धाव्याघ्रपात्सेवांसेकायनिःगविनिःवरिष्याःउद्दालकरण्याःऔडलोपिःकौनोडिःकोलाय
नाःमुंदहरिः।कौंडेवृद्धिःमौवञ्चापनाःआनंतायनाःलोमन्यःन्यचत्त्याकपिलाःपार्णकायनाःपाणयिल्को
टवलकानवाःविद्यावनाःवाहकयःआविद्धिपयःवैश्यउपयःहरितमास्थाःसप्तवेलाविशिखाइतिवशि ९५
ष्ठरश्वैयाःवासिष्ठेति।कुंडिनाःलोजायनाःगोगुल्लाःआम्बस्यावैकर्णपाःआविल्वाःवदराःआश्मरथ्यवा
हवकौंकोक्याःसांगालिनःकायटवःपेटकाःनवग्रामाःहिरण्याद्यायेद्यापैप्पलादयःमाध्यन्दिमाध्यं

दिनाःशांतिमोपतिरितिकुंडिनाःआर्षेयाःवासिष्ठमैत्रावरुणकौंडिन्येति।उपमन्यवःऔपगवाःमांडलेख
यःकापिंजलाःजलाग्नेयाःतपोलोकाःत्रैवर्णास्त्वैबास्तागिरिःस्वराइशाःमौलालयःवैलहलिनोमहा
कर्णयिनाःवालशिखाःऔद्दास्नानयःवलायनाःनागुरिरथायनाःकुंडोदरायणाःलाक्ष्मणेयाःका
ठांधयोवाकश्विधाःआनुकूरवाःआलवचाःकपिकेश्वइत्युपमन्यवःआर्षेयाःवासिष्ठंइंद्रप्रमदानरद्व
सब्येतिपराशराःकंगुनायःवाजयोवाजिमंतयःवैमतापनाःगोवालिप्रोहयोवैकल्पयःसात्यःकौमु
दादयोहार्यश्वाःखल्वायनाःगोपायनाःख्यातयाःआरुणिःवारुणिःनालुकावाउरिःचक्राह्रयनाःको
कलयःकैमतिःकृष्णाजिनाःकपिमुखाःवात्स्यायनयःश्वेतश्पथःपौष्कलसाचिःगार्ग्यायिनयःबाण
यःश्यामेयाःयौनुरिःमहतोलिरितिपराशराःआर्षेयाःवासिष्ठशाक्त्यपाराशर्येति।एतेषांचतुर्णां

वशिष्ठानामेकस्य वशिष्ठस्य ध्रियमाणे तयानुवृत्तासमगोत्रत्वात्समप्रवरत्वाच्चान्योन्यमविवाहः॥ इत्यु
क्ता वशिष्ठाः॥ अथोद्दिष्टक्रमेण दश विश्वामित्रा उच्यंते॥ विश्वामित्राः कुशिकाः पाणिजंघा वालुकाश्चौ
दरिमाणिः वृहदग्निआल विशाघ हिरण्यपद्मध्यानः कामंतकाः वद्धकथाः विकितामकायनाः शार्लकाय
नाः शांकायनाः यमदूताः आनंनिराः तारकायणः चार्वमाजावालयः याज्ञवल्क्याः विद्गाः नुवनय
नाः सौश्रुतपाः औपदस्तयाः औदुंवरिः श्रीष्याः श्यामेयाः वैत्रेयाः मारवताः मयूराः विश्वनायताः अनुतंत
योर्मातवोधवात्येअतनशाद्वाःवाभ्रव्याः कारवलोभ्रराइतिकुशिकाआर्षेयाः वैश्वामित्रदेवरातऔद
लेति॥ रोहिताः देडकयाः वाक्रदिमथिणीरद्रायणाः वाजभ्यनाः वामपइतिरोहिताः आर्षेयाः वैश्वामि ९९
त्राष्टकरोहितेति॥ रेवव्यकाः स्वोदृहाः वलारेवणाइत्येते आर्षेयाः वैश्वामित्ररोक्यकरेंवरेणेति॥ वैश्वा

मित्रदेवश्रवसदैवतरसऔमनज्यायकायनकामकायनाः आर्षेयाः वैश्वामित्रदेवश्रवसदैवतरसेति॥ क
ताः सैरंध्राः करनाः वाजयनाः शिशिराः कौकुत्स्याः पिंडियावाः नारायणाः नारायाइतिकताः आर्षेयाः
वैश्वामित्रकात्यात्कीलेति॥ धनंजयाः पारिजातयः आश्रयेतानाः वायव्याः सैधवावनयाः पुष्कराक्षाइतिध
नंजयाः आर्षेयाः वैश्वामित्रमाधुछंदसधनंजयेति॥ अजानिनेदा॥ आर्षेयाः वैश्वामित्रमाधुछंदसआजे
ति॥ अघमर्षणाः कौशिकाइत्यार्षेयाः वैश्वामित्राघमर्षणकौशिकेति॥ इरणावरिक्षपर्यंतइतिचार्षे
याः वैश्वामित्रपौरणेति॥ इंद्रकौशिकानिनेदाः आर्षेयाः वैश्वामित्रैंद्रकौशिकेति॥ एतेषां दशानां विश्वा
मित्रेंद्रकौशिकेति॥ एतेषां दशानां विश्वामित्रगणानां गोत्रैक्यात्प्रवरैक्याच्चान्योन्यमविवाहः॥ इत्युक्ता वि
श्वामित्राः॥ अथयथोद्दिष्टक्रमेण योगस्त्यपउच्यंते॥ अगस्त्यो विशालाक्षाः कालायनाः औदनपः कुल्माष

सं०म०८९

हरितायणाः प्यनः सावर्णिः वर्वंदयो वैरण्याः बुध्ने दकसैव पथ्याः शाल्वातपाः मौंजिकराः गार्ग्योः रथो
माः शांडिधारा पथोठताः दार्ग्रीवाः रोहिण्याः सोमलयाः इत्यगस्तयः त्र्यार्षेयाः आगस्त्य दार्ढ्यच्युतेध्म
वाहेति तेषां मवाहः निनेः दात्र्यार्षेयाः आगस्त्य दार्ढ्यच्युत सांमवाहेति। सोमवाहा अपि निर्मदात्र्यार्षेयाः
आगस्त्य दार्ढ्यच्युत सोमवाहेति एतेषां त्रयाणां मास्तानां गोत्रै कात्म्यं वैरक्यायान्योन्य मविवाहः। यत्तु बौ
धायनेनागस्त्य भेदाः निर्वाहाः यज्ञवाहा इति अन्यदपि नेदद्वयमुक्तं। तल्लोकाप्रसिद्धमिति नोक्तं। इति बौध
यनसत्याषाढकुमारकन्दर्पचाश्वलायनामाधवानन्तदेवादिसमप्रवराध्यायोक्ताः अथ सत्रांतरस्थो विशेष उच्यते त
त्र आयसं वनतावत्तमोर्विद व्यतिरिक्ताः पञ्चगणा उक्ताः। कश्चिद्विशेषश्चोक्तः स यथा। वत्साः आवर्णि ८७
वर्तिजामात्येति शाखन वैरोहित्यवद् मंडु प्राचीनयोग्याइत्यष्टानेदत्तिन्द्या बोधायनवत्पंचप्रव

रा नार्गवीर्व्वज्ञामदग्न्येति त्रिप्रवरा अप्युक्ताः। आर्ष्टिषेणानि नैदा एव। प्रवराः पंचोक्तश्च वा एव। यस्काणां च
यस्कवाद्गूलमेनमौकेमेवा वानरनेदत्तिन्द्यो वा तत्र आगणत्वेन व्यपदिष्टः एवोक्तिस्त्रिप्रवर एव। मित्रयुवो वै
ध्याः शुनकाः स्वयः क्रमात्वाध्म्याः पार्थ्यगिर्त्समदा इत्येकैकं नेदाल्ल देकैकार्षेया एव नतु बौधायनवत्त्र्या
र्षेयाः गौतमांगिरसां तु चत्वारो गणाः। आयास्य उचथ्या औशिजा वामदेवा इति सवैश्वानरनेदः रहूगणाख्या
र्षेयाश्च तत्राद्यानां बौधायनवत्। द्वितीयानां आंगिरसोचथ्यगौतमेति। तृतीयानामांगिरसौशिनकाक्षीवते
ति चतुर्थानामांगिरसवामदेव्यबार्हदुक्थ्येति। भरद्वाजांगिरसां तु भरद्वाजाः कृष्णा आग्निवेश्या उऋायनाः
शुंगाः कताः शैशिरयाः रूक्षाः कपयः गर्गा इति। तत्राद्याश्चत्वारो बौधायनवत्त्र्यार्षेयाः शुंगाश्च स्वयमांगि
रसवार्हस्पत्यभारद्वाजकात्यात्कीलेति पंचार्षेयाः तत्काः बौधायनवत्त्र्यार्षेया आंगिरसवांदतमालनालव

चमेति त्र्यार्षेया अप्युक्ताः कपयो वा गायनवत् त्र्यार्षेयाः। गर्गा नित्यवत्स्यं चार्षेयाः किंतु आंगिरसगार्ग्यशैन्येति
त्र्यार्षेयाः। सुंगायास्त्वयो द्यामुष्यायणाः। तेषां भरद्वाजैर्विश्वामित्रैश्चासहनविवाहः। कविकपिलानामप्यांगि
रसबार्हस्पत्य भारद्वाजवांदनमालवचमेति पंचार्षेयाणां भरद्वाजैर्विश्वामित्रैश्चाविवाह उक्तः। किंवलांगिर
सां सप्तगणाः। आद्यांगिरसा हरिताः कुत्साः आजमादाः कण्वाः विरूपाः रथीतरा मुद्गला विष्णुवृद्धाश्चेति। त
त्राद्या मांधात्रांबरीषयौवनाश्वेति त्र्यार्षेयाः। द्वितीया आंगिरसमांधात्रकौत्सेति। तृतीयाः शैववदेव। चतु
र्था आंगिरसवैरूपपार्षदश्वेति। आंगिरसस्थाने अष्टादंष्ट्रो वा। षष्ठसप्तमौ शैववदेव त्र्यार्षेयौ। मत्स्यतये श्र ९८
लिना आद्यस्येकनेत्रा एवोक्ताः। शैलिप्रवरे पुत्रांगिरसस्थाने शाक्त्य उक्तः। अत्रीणां षड्गणाः। आद्यास्त्रयः
गविष्ठिरः आतिथ्यपा। वामरथ्याः सुमंगलाः बैजवापाश्चेति निर्देशः। तत्राद्यद्वितीययोः शैववत् त्र्यार्षेयाः।

तृतीयानां मात्रेयार्चनानसातिथेति। एत एवोत्तरत्र पांताः। कश्यपप्रनोत्रयो गणाः। निध्रुवस्थाने कश्यपारेभाः
शांडिलाश्चेति। तत्राद्या देवलामतेति त्र्यार्षेयाः। काश्यपदेवलासितेति त्र्यार्षेया वा कश्यपशाक्त्यपाराश
र्येति विकल्पस्तस्य आर्षेया अप्युक्ताः। विश्वामित्राणां पंचगणाः। विश्वामित्राः मोतस्कामकायनाः। कात्या
अष्टकारोहिताः अघमर्षणाः कुशिकाश्चेति तत्रोपांत्याः त्र्यार्षेया वैश्वामित्राष्टकेति। अन्य द्वौ अनयनव
त्। अगस्तीनां गणाः बौधायनवत्। तत्राद्यागस्त्य एकार्षेया अपि आगस्त्येति। शेषं शैववत्। इत्यापस्तंबो
क्तः सप्रवरोत्तरवादिगणनिर्णयः। कात्यायनेन तु गोत्रद्विगणा उक्ताः। तत्र वत्सा आर्ष्टिषेणा जामदग्न्याः। वात्स्या
यनाः श्वावाव्या वैजवापाः शाक्करमाठराः। अष्टौ वत्सा जामदग्न्याः। विदा आर्ष्टिषेणा वत्सपुरोधसः वैदाविश्नुयो
निश्चापपार्थ्यवेला आपिशायनावालद्याणाः स्वमिदाश्चेति। तत्राद्या वत्सवत् संचार्षेयाः। द्वितीया भार्गवच्या

वस्थावात्स्येतित्र्यार्षेयाः॥ तृतीया नागविद्या वत्स्या आप्नवानवैजवनेमाथितेतिपंचार्षेयाः॥ तुर्या नागविद्या टर
माटरेतित्र्यार्षेयाः॥ पंचमा नागविद्या वनाषवातेतित्र्यार्षेयाः॥ षष्ठा बोधायनवासंचार्षेयाः॥ सप्तमा नाग
वद्यावनामश्वानवाज्ञपौरोधसेतिपंचार्षेया नागविवञ्ञा पुरोधसेतित्र्यार्षेयाः॥ अष्टमा नागविद्वदैव
स्वज्योतिषेतित्र्यार्षेयाः॥ नवमा नागविवैन्यपार्थेतित्र्यार्षेयाः॥ दशमा नागविवाश्वदेवोदासेतित्र्यार्षेयाः॥
एकादशा नागविवीतहव्यसावेधसेतित्र्यार्षेयाः॥ द्वादशा गार्ग्यमदंत्यैकार्षेयाः नार्गविगार्ग्यमदंतित्र्यार्षेया
वा॥ गौतमांगिरसां वत्वारो गणाः॥ औतथ्या आयास्य पंतिम सौविजाश्वेति। तत्राद्या हितायाश्चत्वर्त्रवत्स्या ९९
र्षेयाः॥ तृतीया बौधायनवत्पंचार्षेयाः॥ किंत्वांगिरसौतथ्य दैर्घतमसेतित्र्यार्षेयाः॥ तुर्या श्चांगिरसायास्यौ
शिजेतित्र्यार्षेयाः॥ भरद्वाजांगिरसामष्टौ गणाः॥ आद्या भरद्वाजाः ततः पंचार्षेया गर्गाः॥ ततस्तृतीयो गर्ग

गण एवत्र्यार्षेयः॥ ततः कपयः॥ ततस्संकृतयो आमुष्यायणाः॥ ततो मुद्गलाः॥ ततः कण्वाः॥ ततः शौंगशैशिरयो द्व्या
मुष्यायणा इति॥ एतेषां प्रवरा बौधायनवत्॥ अत्र संकृत्यादयस्त्रयः केवलांगिरसे शत्रुक्त्या इति सप्रमाणं
सूत्रं तु परमगुरवः॥ अतो त्रिगणपंचकमेव फलितं॥ केवलांगिरसां गणा स्त्रयः मुद्गलाः कण्वाः संकृतयो द्व्या
मुष्यायणा इति॥ तत्र संकृतीनां बहुद्वैधा भेदाः॥ संकृतिः पूतिमाषः तंडिः शंबुः शैवगवः ऊनकिंतैरायणः
रक्षायणिः वारायणिः सदृक् गांगिर्लौगाक्षिः नालः जनगर्हरिरिति॥ अत्रिगणं त्रयोगणाः आद्यास्त्रयो गविष्ठिरा अ
त्रेः पुत्रिकापुत्राश्चेति तत्राद्य उक्तार्षेयाः॥ द्वितीयास्त्रैयगाविष्ठिरपौर्वातिथेतित्र्यार्षेयाः॥ अंत्यास्त्वात्रेय
कामरथ्यपौत्रिकेतित्र्यार्षेयाः॥ कश्यपास्त्रयस्तंब बहुलाः॥ लौगाक्षयः कश्यपा द्व्यामुष्यायणानां प्रवरस्तु वदे
बोक्ता॥ वसिष्ठानां चत्वारो गणाः द्व्यामुष्यायणज्जातूकर्ण्येन सह बोधायनवत् बहुलाः॥ सत्र्यार्षेयः वासिष्ठा

त्रिजातूकर्णेति। विश्वामित्राणां षड्गणाः। तत्राद्या। विश्वामित्राः। अजाः। कूरणाः। रोहिताः। अंगिरोद्यानु
व्यायणाः। ऐतरेयाः। रेणव इति। विश्वामित्र गाथिन रैणव इति त्र्यार्षेयाः। अन्ये तु कात्येया एव। लौगाक्षिणा
लुनुगो सहगणा उक्ताः। तत्र वत्सा विदा भेति द्वौ जामदग्न्यौ। पंचाजामदग्न्याः। वात्स्याः आर्ष्टिषेणाः स्वालाय
नावीतदव्यागर्ग मदाश्वेति। तत्राद्य चतुर्थौ वोधयन वत्स चार्षेयौ। द्वितीयाः आर्षेयाः। भार्गव दिवोदास्ये
ति। तृतीयाः आर्षेयाः भार्गवच्यावनाप्नवानेति। पंचमा मित्रयुववद्र्यार्षेयाः। षष्ठा आर्षेयाः भार्गव वैतहव्य
सावेतसेति। सप्तमाः कात्यायनवदेकार्षेया आर्षेया वेति गोतमांगिरसो भरद्वाजांगिरसः केवलांगिरसः संके
तयश्चेति सर्वे गिरसः सर्वे त्र्यार्षेया वाशिष्ठा विश्वामित्रा अगस्त्य पञ्चक कसायनवदेवोक्ताः। कश्यपास्त्वापत्तंव १००
वदुक्ताः। लौगाक्षपक्षवोधायनवदेवोक्ताः। आश्वलायने तु भृगोः द्वर्वं वत्ससेव गणज्ञक्ता कश्चिद्

ऽन उक्ताः सयथा। वत्साजामदग्न्याः अजामदग्न्याश्च। तत्राद्याः स्वर्वत्स्यं चार्षेयाः। द्वितीयाः आर्षेया भार्ग
वच्यावनाप्नवानेति। विदादयः अजामदग्न्या एव। तत्र विदाः आर्ष्टिषेणाः सर्वे त्र्यार्षेयाः। यस्काः द्व
र्वं वत्स्यार्षेयाः। वैन्यस्थानैस्यै नामित्रयुवस्क प्रवरा आपिवाभ्यश्वेति। शुनकाः षस्त्र्यायाः आपिताः गवि
शौनका शर्मदेति। गौतमांगिरसांतः सप्तगणा उक्ताः। गौतमा उतथ्या राहूगणा सोमराजका वामदेवा बृ
हदुक्थ्याः कक्षीवताः दीर्घतमसा इति। तत्राद्यानामार्षेया आंगिरसायास्यगौतमेति। उतथ्यानामांगिरसौ
तथ्यगौतमेति। राहूगणानामांगिरसराहूगण्यगौतमेति। सोमराजकानामांगिरससोमराज्यगौतमेति।
वामदेवानामांगिरसवामदेव्यगौतमेति। बृहदुक्थ्यानामांगिरसबार्हदुक्थ्यगौतमेति। कक्षीवतामांगिरसौ
चथ्यगौतमौशिजकाक्षीवतेति। दीर्घतमसामांगिरसौचथ्यदैर्घतमसेति। अत्रोक्ताः कक्षाः भरद्वाजेषुरौ

ज्ञायणशाद्वे न बौधायनेन पठिता इति तेषे बोद्धव्या॥ हषदश्वाल्क बौधायनोक्तैः केवलांगिरसैरथीत
रैः महांगिरस वैरूपेति प्रवरद्वयेका केवलांगिरसे ष्वत्कष्टव्या॥ अतो नाष्टगणता संपत्तिः॥ नरद्वाजा
गिरसांतु यथपाद्द नरद्वाजाग्निवेश्याद्दसेकर वगणउक्तः तथाप्युक्तनीत्या गोतमेष्टकाम्त्वाः केवलां
गिरसो पुवक्ष्यमाणा॥ गर्गाः कपयो ष्यानुष्यायणाः शौंगशैशिराश्चैवं सं तेपि वत्वारो गणाः॥ ज्ञया॥ तत्राद्याः
त्र्यार्षेया आंगिरसवार्हस्पत्यनारद्वाजगार्ग्यसैन्येति। आर्षेया वा आंगिरससैन्यगार्ग्येति चतुर्थ्यो त्र्यार्षेयाः
आंगिरसामहाय वो रुक्षयसेति। अंत्याः पंचार्षेयाः आंगिरसवार्हस्पत्यनारद्वाजकात्याक्लास्तैनिकेवलांगि
रसांतु षड्गणाः तत्र मुद्गलानामांगिरसतार्क्ष्यमौद्गल्येति। तार्क्ष्यनार्क्ष्यमौद्गल्येति वा विष्णुवृद्धानामां १०१
गिरसपौरुकुत्सत्रासदस्यवेति। हरितकुत्सपिंगशंखदर्भणि नगवानामांगिरसांबरीषयौवनाश्वेति।

मांधात्रांबरीषयौवनाश्वेति वा। संकृतपूतिमाषतंडिवांबुरौवगवानामांगिरसगौरिवीतसांकृत्येति। शाक्त्य
गौरिवीतसांकृत्येति वा। कण्वानामांगिरसाजमीढकांरावेति। आंगिरसघौरकाण्वेति वा गोतमेष्टकानां
हषदश्वानामांगिरसपार्षदश्ववैरूपेति। अष्टादंष्ट्यार्षदश्ववैरूपेति वा। एवं बौधायनोक्तरथीतरैर वि
वाहः प्रवरद्वयसाम्यात् अथोक्ता गर्गाः कपयः शौंगशैशिराश्च नरद्वाजेष पठ्यव्याः इति सप्रपंचमुक्तं पि
वाहः प्रवरद्वयसाम्यात् च वत्सगोत्रप्रवरनिर्णयः। एतेन कपेः केवलांगिरसत्वमंगीकृत्य नरद्वाजैः महात्वयमिवं
तामद्दवरणे अच्छलगोत्रप्रवरनिर्णयः। एतेन कपेः केवलांगिरसत्वमंगीकृत्य नरद्वाजैः मद्दात्वयमिवं
लकेविह पान्त्ता॥ अत्रीणांतु त्रयो गणा उक्ताः आत्रेया वाद्भुतका गविष्ठिराः पूर्वातिथयश्चेति। तत्रांसाना बौधा
यनोक्तमुद्गलवत्प्रवराः। कश्यपानां वत्वारो गणा उक्ताः॥ तत्र हिनिध्रुवादिभ्यो निरूपपदाः कश्यपाः इत्युक्
क्ताः॥ प्रवरास्तु काश्यपावत्सारासितेति। शांडिलास्तु बौधायनोक्तचतुर्थपंचमप्रवरविकल्पवंतः॥ कश्य

पथ्यामुष्यायणलौगाक्षयक्तनोक्ताः एव। वसिष्ठाश्च बौधायनवदेवोक्ताः॥ विश्वामित्राणां द्वादश गणा
उक्ताः॥ तत्र विश्वामित्रकामकायनधनंजयअजहरणकतअघमर्षणरेणवः पूर्ववत्। रौक्षकैःकौशि
कौतुनोक्तौ। रोहिणानां वैश्वामित्रमाधुछंदसरौहिणेति। अष्टकानां वैश्वामित्रमाधुछंदसाष्टकेति। वे
णूनां वैश्वामित्रगाथिनवैणवेति। शालंकायनानां वैश्वामित्रशालंकायनकौशिकेति। अगस्तीनां त्वेक ए
व गण उक्तः॥ अगस्तीनामास्यदार्ढ्यच्युतेध्मवाहेति सोमवाहो वो त्रन इति प्रवराः वामस्यासादनापि न गोत्रा
श्वलायनवद्धूम्राद्धेध्मवाहस्त्वगस्त्यमदरयाएवेति मैत्रगणउक्ताः॥ कश्चिद्विशेषश्चोक्तस्तथाप्युनकाश्य
र्षेयाः नागविशो नहो त्रगार्ग्यमदेति। आर्षेयावागार्ग्यमिदनागदेति। रकार्षेयागार्ग्यमिदेति। गौतमांगिरसांतु १०२
वृद्धक्त्यानुवृत्ताष्टावंशेणमहांश्वलायनवदेवदशगणाउक्ताः॥ अपिशेत्तकश्यपदक्षयोरुक्तश्चेडिंय।

नरद्वाजांगिरसांतु कपिश्चतिरिक्ताः आश्वलायनवत्त्रय एव गणा उक्ताः। केवलांगिरसांतु रथीतरमति
रिक्ताश्वत्वारोगणाः॥ तत्र मुद्गलहरितयोराश्वलायनवद्वैकल्पिक प्रवरा अयुक्ताः। सहतपस्त्वाश्व
लायनवदुक्ताः॥ अत्र स्फुटमेव पुत्रिकापुत्राउक्ताः॥ तत्र धनंजयकमषयमरिक्तःटपार्थिवपार्गेन्य एके
वैश्वामित्रमाधुछंदसधनंजयेतित्र्यार्षेयाः॥ अपरे पुत्रिकहालयकौत्रेवत्तौत्रपशालेयवामरथ्यगोप
वनाऽत्रिवनुरार्षेयास्तेने आत्रेयआर्चनगाविष्ठिरपुत्रिकेति। कात्यायनोक्तत्र्यार्षेयाः आत्रेयवामरथ्य
गौत्रिकेति। उनयेवैतेऽत्रेःपुत्री हनयोःपुत्र्योर्वैश्वामित्रधनंजयवासिष्ठवामरथ्याश्चोत्सत्राऽत्रिविश्वा
मित्रैर्वासिष्ठैरत्रीनि च नाद्दद्येयत्त्वुरितिपुत्रंतज्ञाप्ये। अत अपकैश्चित्कौऽत्रकस्यानाम त्रिविश्ववसिष्ठा
न्यामविवादहलिनदत्रिमात्रविजयंपुत्रिकापुत्रविषयवानमंनवनीतुपेक्ष्यामितिपितामहचरणाः। त

दाशार्यं नजानीतैरेवायेज्ञात्कृकर्ण्येवसिष्ठोपिद्याद्वा ॥ कौतिकाः स्वगः॥ वशिष्ठान्त्रिनवास्थाश्राषस्तिज्ज्ञाः स
वैष्ठिगोत्रजाः॥ आत्रकर्ण्येवाशिष्ठोद्वावुत्तमोत्रिस्वपार्थिवि । परस्परमवैवाह्यात्मयः परिकीर्तिताः इति मा
त्स्याज्ज्ञात्कर्ण्यानि नामपिवाशिष्ठात्रिज्ञात्कर्ण्येति त्रिप्रवरवतां द्यामुष्यायणानामंगिरस्त्ववाशिष्ठात्रि
त्याम नुष्ठाह स्योक्तत्वात् ॥ आतो ज्ञात्कर्ण्यैः सहात्रेः पुत्रिकापुत्रास्त्रिविधः इत्युक्तं भवति । कश्यपानां
त्वाश्वलायनवदृणचतुष्टयमुक्तं । कश्यपद्यामुष्यायणलौगाक्षीणां तु गोत्रद्वयेऽनुष्ठानमुक्तः॥ वशिष्ठा
नां तु बौधायनाश्वलायनवदृणचतुष्कमुक्तं लौगाक्षयः संकृत्यो ज्ञातृकर्ण्यश्चेति त्रयो द्यामुष्यायणा
श्वोक्ताः॥ विश्वामित्राणां तु आश्वलायनवत् द्वादशैवगणा उक्ताः॥ तत्र च बौधनंजय कतौ द्यामुष्यायणा
वुक्तौ ॥ प्रवरास्त्वेतयो बौधायनवदेवोक्ताः ॥ अगस्तीनां त्वाद्यागस्त्यएवागस्त्यदार्ढ्यच्युतेध्मवाहेति

आर्षेयाः॥ सोमवाहेत्येकार्षेयावोक्ताः॥ अत्र च बौधायनोक्त वज्ञादिप्रवरसंवादिप्रवरवंतः स्वत्रांतरे वा
श्वायनादिसाद्विनामांतरतो येउक्तातेन चैवांतर्भूता ज्ञेयाः॥ ये तु तादृशसंवादिप्रवरवंतो नामांतरेण वोक्ता
स्तेन तत्रांतर्भवितव्याः॥ यथा कृष्णकात्यायनोक्ता वेदविश्वज्योतिषः॥ आवाश्वा वैज्ञवाः शादरमाद
राश्वयाद्याः गोतमेषु आपस्तंबोक्ताश्चोचथ्याश्चौशिजा लौगाक्षयुक्ताश्चायास्याश्चौशिजाः॥ आश्व
लायनोक्तारकगणाः सोमराजकिः वृहदुक्थाः कक्षीवताः केवलांगिरसेषु कुत्साः पृषदश्वाश्च । अत्रि
ष्वतिथयः विश्वामित्रेषु जाः । कुशिकाद्यर्थयाद्य वेणवा शालंकायनाः॥ अगस्त्येषु कासायत लौकाः पु
लस्य पुलहक्रतवः पौर्णमासादयो नांतर्भवंतिः स्वोक्तौ नपंचाशद्गणेषु वोनयद्विधः कृष्णेनतमांगिरोग
स्यानां द्यामुष्यायणानसंख्ये वाक्यविदपदर्शनात् । तदन्येषां तु संमतिः यथा नरकाजविश्वामित्रयोः शौ

मा॥ कला॥ शैशिरयः। कपिलाश्चैकेषां मते। अत्रिविश्वामित्रयोर्धनंजयाः। अत्रिवशिष्ठयोर्वामिरथ्याद
योऽजपत्न्कल्याश्चाकेवलांगिरसवशिष्ठयोः संकृतयः पूतिमाषादयश्च। कश्यपवशिष्ठयोश्चलौगाक्षयः।
एतेष्वप्येवं सर्वमिवतत्रतत्रोक्तमन्यत्तु केचिद्देवराता वैश्वामित्रदैवराताश्चोरलेतिश्यार्षेया विश्वामित्रजम
दग्न्योर्द्व्यामुष्यायणाःपनसाश्चैवमित्युक्तत्तत्स्वलंम्भपौ क्षत्रियवैश्ययोस्तु विशेषमाह तुः कात्यायनस्तौ
गाक्षा पुरोहितप्रवरो राज्ञामेते। नैव वैश्यप्रवरो व्याख्यातइति। प्रवरस्य ग्रहणं गोत्रस्याप्युपलक्षणं। यत्त
ब्राह्मणोऽप्यज्ञानस्वगोत्रप्रवरः। स्मात्रस्मर्यते। गायत्र्यांयस्ययोर्यातत्कन्यां विवहेत्तम॥ तत्रोत्रेतत्कुले १०४
वापि विवाहो नैव दुष्यति तथा तत्रैव। द्यामुष्यायणसंज्ञायेदत्तकक्रीतकादयः गोत्रद्वयेप्य ऊढायः शौंग
शैशिरयोस्तथैवेतिसगोत्रसप्रवरोद्वाहे बौधायनः॥ सगोत्रां चेदमत्योपयच्छेन्मातृवदेनां बिभृयात्॥ सगो

त्रेतिसप्रवरोपलक्षणं गृह्यपरिशिष्टे। अविरुद्धसंबंधमुपयच्छेत विरुद्धसंबंधा यथा भार्यास्वसुर्दुहितापि
तृव्यपत्नीस्वसा चेति स्मृत्यंतरे। एकजन्ये तु कन्ये द्वे पुत्रयोर्नैकजन्ययोः॥ न पुत्रीद्वयमेकस्मै प्रदद्यात्तु क
दाचनेति एवमुक्ता वधूगुणाः। तानेव वरेप्यतिदिशति योगी। एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः। य
लात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः॥ सवर्णस्तु उत्तमजातेरप्युपलक्षणं। तथा च योगी। तिस्रो वर्णानु
पूर्व्येण द्वे तथैका यथाक्रमं। ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्रजन्मनः॥ एतच्चानुकल्पविषयं। तदाह
मनुः॥ सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः॥ अत्र विज्ञा
नेश्वरः॥ रतिपुत्रधर्मार्थित्वेन विवाहस्त्रिविधः॥ तत्र पुत्रार्थो द्विविधो नित्यः काम्यश्च तत्र नित्ये पुत्रार्थे सव
र्णः श्रोत्रियो वर इति सवर्णामुख्योक्ता। काम्यविवाहे। नित्यविवाहानुकल्पे च तिस्रो वर्णानुपूर्व्येण समा

सं०म०१०५

अन्नस्यापवादः। यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः। नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयमिति।
अत्र तत्रात्मा जायते स्वयमिति वाक्यशेषात्। रत्यर्थेन त्वमित्वपरिहारमात्रार्थे धर्मार्थे चेति बोध्यम्। क्लीबे
लोतिप्रवृत्तेः शूद्रायन्यनुज्ञापतइत्यिप्यलात्पराङ्गिनः इत्यनेनोक्तं। तत्प्रकारमाह नारदः॥ यस्याप्सु प्लवते
बीजं ह्रादि मूत्रं च फेनिलं। पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु पंडकः॥ नारदः॥ चतुर्दशविधः पंडः शास्त्रे
दृष्टो मनीषिभिः। चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात्। निसर्गपंडो वद्ध्रश्च पक्षपंडस्तथैव च।
अभिशापाद्गुरो रोगाद्देवक्रोधात्तथैव च। ईर्ष्यापंडश्च सेव्यश्च वातरेता मुखेभगः। आक्षिप्तो मोघबीजश्च शा
लीनोन्यापतिस्तथेति। तत्र निसर्गपंडो लिंगवृषणहीन एवोत्पन्नः। वध्रो गलितांडः। पक्षांतरितरेतिशक्तिः। ईर्ष्या १०५
पंडस्तु विषये ईर्ष्योत्पन्नेनितरेताः। सेव्यस्त्रियाबहुप्रकारं संभोगमानो जातरिरंसुः। वातरेता पत्यरतो।

तेलिंगे वातनिःसरणमात्रं जायते। मुखेभगः परनिष्ठे मुख एव भगकार्यकारी। आक्षिप्तरेताः विसर्गसमये
यस्य रेतः पृथक् प्रवर्तते। मोघबीजो गर्भाधानासमर्थरेताः। शालीनोन्यस्त्रीस्पृष्टसंनिपाती लिंगियानग्नः अ
न्यापतिः भार्यातिरिक्तान्यागनारतिसमर्थः। पंडवदन्यानपि वर्ज्यानाह कात्यायनः। उन्मत्तः पतितः कुष्ठी त
थाषंडः स्वगोत्रजः। चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः। वरस्तानामवेयानां मोक्षमार्गानुसारिणां।
स्त्राणां निर्धृतानां च न देया कन्यका बुधैः। वासिष्ठे। अत्यामत्रैतिदं रैवं त्वस्या घ्नवातिदुर्बलो। दूरेत्रिहानेवमूर्खे
वषधुकन्यानदीयते। पाराशर्ये। कन्यां यच्छति वृद्धायनीचायधनलिप्सया। कुरूपायकुशीलाय सप्रेतोज
यतेनरः। अथ कन्याविवाहकालः॥ बौधायनः॥ दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे। अपि वा गुण
हीनाय नोपरुंध्यात् रजस्वलां॥ यमनु॥ काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि। नत्वेवैनां प्रयच्छे

तद्गुणहीनायकर्हिविति। तद्गुणवतिसंनवतिगुणहीनायनदद्यादित्येवंपरं। नग्निकाशब्दार्थे विशेषयो
यावन्नलज्जांयातिकन्यापुरुषसंनिधौ। योन्यादीन्यावगूहेत तावद्भवतिनग्निकेति। कन्यकेत्यपिकुचि
न्याटः। लज्जापेतिसहार्यत्वतया। नहिस्वर्थे अमरकोशेतु। नग्निकानागतार्तवेत्युक्तं यमः॥ अष्टवर्षा न
वेद्गौरी नववर्षा तु रोहिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला। ऊर्ध्वमेकादशे वर्षे संवर्तस्मृतौ तु।
नवमेन नग्निका नवदितिपरित्संवर्तः। प्राप्ते काले तु संप्राप्ते सोमो भुङ्क्ते तु त्यक्तां। रजःकाले तु गंधर्वो वह्निस्त
कुचदर्शने। तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत्। गौर्यादिदाने तु फलमाह मरीचिः॥ गौरीं ददन्नाकपृष्ठं
वैकुंठं रोहिणीं ददत्। कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलां। सालंकारकन्यादाने फलमाह संवर्तः॥ कूप १०६
दश्वाश्वमेधीवशाणदानान्येयणुव। समंयान्निरयान्ने पांश्योवेनान्नमंत्रायः सालंकारकन्यादानाकूप

रः॥ यः कृत्सालंकृतां कन्यां यो ददाति स कूपदः। इत्यमरोक्ते वरविवाहकालोप्युक्तो मानवे त्रिंशद्वर्षो विहेत्कन्यां
हृद्यां द्वादशवार्षिकीं। अष्टवर्षेष्टवर्षां वा धर्मे सीदति सत्वरः। बार्हस्पत्येपि। त्रिंशद्वर्षो दशाब्दां तु भार्यां वि
देत नग्निकां। एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयादिति॥ बौधायनोपि॥ वर्षाणि कुगुणांनायमितिरहेत्रि
णः स्वयमिति। अथ स्वयंवरकालः। तत्राह यमः॥ कन्याद्वादशमेवर्षे प्रदानुनगृहेवसेत्। भ्रूणहत्यापि
तुस्तस्याः सा कन्या वरयेत्स्वयं प्रदातुः पित्रादेरभावे तत्र तु सर्वाः पित्राद्यभावे पाहयोगागम्यत्व नावेदाह
णां कन्या कुर्यात्स्वयंवरमिति। एतच्च वरणवयमनुप्रवृत्तिवर्षत्रयं प्रतीक्ष्य कार्यं। तदाह बौधायनः॥ त्रीणि
वर्षाण्यृतुमती कांक्षेत पितृशासनं। ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिं। अविद्यमाने सदृशे गुणहीन
मपि श्रयेत॥ पत्नुविसु॥ ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरमिति। तदंतु अयादर्वाक्निषेधपरं। तेनय

दानवर्षत्रयमवस्थातुमर्हं तदा ऋतुत्रयादर्वाक् तत्करयेत् किंतु तदूर्ध्वमित्यर्थः। वरणानंतरं वरमरणे विशे
षमाह कात्यायनः। वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा। ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेत्पिता।
रक्तागमांस्त्वागमात्। देशांतरगमने तु नारदः। परिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्। त्रीनृतून्सम
तिक्रम्य कन्यान्यं वरयेद्वरं। अलंकारं नाददीत पित्र्यं कन्या स्वयंवरा। मातृकं भ्रातृदत्तं वा स्तेना स्याद्यदि तं हरे
त्। रजस्वलां न परिणयेदित्युपक्रम्याश्वलायनः। यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः। असंभाष्यो ह्य
पांक्तेयः स विप्रो वृषलीपतिः। कन्यामृतुमतीं शुद्धां लब्धानि हतिमात्मवान्। तया च कार्यं पित्रा नानुदहेत्ता १०७
न्वयं संधीः। पिताप्यत्र स्वपुत्र्याः कुर्याणये हादितां सुधीः।। दानावधिर्वरस्य तु तासां ऋत्ये च ऋजो वतीस्यात्रदनु
संख्यागाः। ज्ञात्वा कन्यापिता यदि। तदा ये कापि निखिन्नदानेत स्यायथाविधि दद्यात् ब्राह्मणेभ्यो नांसत्ति नि

ष्वाः सदृशेण्णं। तस्मात्तीतर्तुसंख्येषु वराय प्रतिपादयेत्। उपोष्य त्रिदिनं कन्यां रात्रौ पीत्वा गवां पयः। अदृष्ट
रजसे दद्यात्कन्यायै नत्र भूषणं। तामुद्वहन्वरो नापि दूष्यां ऊर्ध्वं क्रियादिति। अपदत्ताया अप्यपहारनय
हारविचारः। तत्र योगी। सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभाक्। एतच्चादुष्टवराभिप्रायं तदाह नारदः।
दत्तां न्यायेन यः कन्यां वराय न ददाति तां। अदुष्टश्चेद्वरो राज्ञा स शास्यस्तत्र चोरवत्। दोषदुष्टे त्वाह गौतमः।
प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति। सोऽप्यपि। दत्तामपि हरेत्पूर्वां ज्यायांश्चेद्वर आव्रजेत्। यत्तु मनुना
दत्त्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः इति तद्दुष्टविषयं। अत एव नारदः। स्त्रीपुंसयोस्तु संबंधाद्वरणं
प्राग्विधीयते। वरणाद्ग्रहणं पाणेः संस्कारोऽथ द्विलक्षणः। तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्
योर्वरणपाणिग्रहणयोर्मध्ये वरणं वरदोषदर्शनादनियतं न पाणिग्रहणं। ततो वाक्कर्तित्वा नावादि

ति नावच्छत एवयम॥ नोदकेन न वा वाचा कन्यायाः पतिरुच्यते। पाणिग्रहणसंस्कारात्सति स्यात्सप्तमे
पदे। अनेन सप्तपद्याः प्राक् पतिमरणे तु मरणेन विधवात्वमित्युक्तं नवनीतिमाधवादयः। तदाह वसिष्ठः
द्भिर्वाचा च दत्तायां म्रियेत प्राग्वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा। पितुरेव न प्रतिग्रहात्तु
रित्यर्थः। वसिष्ठस्तु पाणिग्रहणे तु पर्यय्य त्वस्मै दानमाह। पाणिग्रहे कृते कन्या केवलं मंत्रसंस्कृता। सा चे
दक्षतयोनिः स्यात्पुनः संस्कारमर्हतीति एतदपि दोषदर्शने एव ज्ञेयं। अत एव यमः। वरश्चेत्कुलशीलाभ्यां
न युज्येत कथंचन। न मंत्राः कारणं तत्र न च कन्यानृतं भवेत्। समाच्छिद्य तु तां कन्यां बलादक्षतयोनिकां।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत्। कात्यायनोपि दोषांतराण्याह। मतुष्यपन्यजातीयः पतितः क्ली
बएवा विकर्मस्थः सगोत्रो दासो दीर्घामयोपि वा। ऊढापि देया साऽन्यस्मै सप्रावरणभूषणा। एतानि

युगांतरविषयाणीति माधवादयः। तदुक्तं स्मृतिचंद्रिकायां स्मृत्यंतरे। देवराच्च सुतोत्पत्तिर्गोमेधं च क
मंडलुं। अक्षतां पौरुषं मेधं कलौ पंच विवर्जयेदिति। मनुरुक्तदोषदर्शने कन्यामात्रे अपि परित्यागमाह। वि
धिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हितां। व्याधितां विप्रदुष्टां च छद्मना चोपपादितां। विविधं प्रकर्षेण दुष्टं।
इदमपि वरदोषद्वयमसप्तपदात्पूर्वमेव ज्ञेयं। तत्रैव नार्यत्वोस्य त्रेत्युक्तं। शुल्कं दत्वा यदि वरो म्रियेत
तदा विशेषमाह मनुः। कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः। देवराय प्रदातव्या यदि कन्यानुमन्य
ते। शुल्कदानुदर्शी न रक्तौ तु विशेषमाह कात्यायनः। प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा। धार्या
सा वर्षमेकं तु देयान्यस्मै विधानतः॥ स एव। अनेकेभ्यो हि दत्तायामनूढायां तु तत्र वै। परागतश्च सर्वेषां ल
नेनादिवरः स्मृतो। अथागतेन वोढायां दत्तां स्वविरो हरेत्। अन्तदत्तायां यस्मै स्वं प्रतिश्रुता स एव कन्यां

लभते। अन्येनोढायां तु स्वदत्तशुल्कमात्रं हरेन्न कन्यामित्यर्थः। अथायनादयः कालाः। तत्राह गुरु
नकालस्त्रावसंहितामाराबल्यां। एकमातृप्रसूतानामेकस्मिंश्च सरे यदि। विवाहं नैव कुर्वंति कुर्वंति तु
ततोन्यथा। अन्यथानिषमातृप्रसूतौ वर्षनेदेव आश्वलायनः। उदगयन आपूर्यमाणपक्षे कल्याणे
नक्षत्रे चौलकर्मोपनयनगोदानविवाहा इति। यत्तु मस एव दक्षिणायनप्रतिप्रसवमाह माघकालमेके
विवाहमिति। तदनुकल्पत्वात्। अन्यथोदगयनविधानवैयर्थ्यापत्तेः। नारदस्तु दक्षिणायनेपि विशेष
निषेधमाह। चैत्रपौषहरौ केशोपावतावत्र मंगलमिति। नारदः। माघफाल्गुनवैशाखज्येष्ठमासाः शुभ
प्रदाः। मध्यमः कार्तिको मार्गशीर्षको निंदिताः परे। नकदापि द्विराषाढे मिथुनानोरार्द्रप्रवेशनात्। विवाहं दे
वलानां च प्रतिष्ठां नोपनायनं। अत्र नकदापि द्वित्वेनाषाढभिकेषात्रागाषाढोप्यन्यनुज्ञातः। गार्ग्यः।

सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः। कश्यपः। उपवासव्रतोद्यादौ चांद्रो यनायनं। तिथिव
र्षादिनिखिलं चांद्रमानेन गृह्यते। नारदः। न जन्ममासे जन्मर्क्षे न जन्मदिवसेपि च। माघगर्भस्तु तस्या
द्यपुत्रस्तु वा किस्यदः। नारदः। नैवोद्वाहो ज्येष्ठपुत्रीपुत्रयोश्च परस्परं। ज्येष्ठमासे तयोरेकज्येष्ठं श्रेष्ठ
मिनान्यथा। अन्यथा द्विज्येष्ठं त्रिज्येष्ठं च नश्रेष्ठमित्यर्थः। अपपरः। बृहस्पतिः। शुक्लः पक्षः शुभः प्रो
क्तः कृष्णश्चांत्यत्रिकं विना। वसिष्ठः। आपूर्यमाणपक्षे तु विवाहो ब्राह्मणस्य तु। इतरेषां तु वर्णानां कृ
ष्णपक्षे विधीयते। अथ तिथिविधिनिषेधनारदः। वसिष्ठः। शुक्ल द्वितीयादिन एव कृष्णपक्षे दशम्यं
तगताः शुभाः स्मृताः। तास्वष्टमी रिक्तदर्शे रात्रुगर्भवतुर्दशी वापि तिथिर्विवर्ज्याः विवाहनाद। नृसिंहः। दु
ष्टं केंद्रजीवानां वारे शुभं नंदनवेत्। शुभानां मंगलार्कं श्रेष्ठं वर्गादिच विवाहकोनक्षत्राण्याह। ह

बृहस्पतिः॥ सौम्यपैतृकहस्तस्वातीमैत्रमूलास्ववायवः॥ त्र्युत्तराणि पौष्णं च रोहिणी शोभनप्रदा॥ अ
श्विन्यासवसवविज्ञ्यम्पुत्तारा पाणिग्रहे सदा सेव्यम्गः। पैतृकं मघा मैत्रमनुराधा। आश्वो अश्विनी। वा
युः स्वाती। पौष्णं रेवती॥ नक्षत्रविशेषजननफलमाह नारदः॥ सुतासुता वा निपतेत् श्वशुरं हंति मूल
जा। तदंत्यपादजा ना पितृं तु याश्लेषाद्यपादजः। ज्येष्ठांत्यपादजो ज्येष्ठं हंति बालो न बालिका। ऐंद्री त
याग्रजं हंति रेवत्युद्भिद्वजा॥ विवाहे वेदविध्नमाह नारदः। हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समंत
तः। स्तंभैश्चतुर्भिः सुश्लक्ष्णां वामभागे स्वसद्मनः। समसंख्यां चतुर्दिक्षु सोपानैरतिशोभितां। एवंविध समार
रोहेत्मिथुनं साग्निवेदिकां॥ अथ कन्यादातृक्रमः याज्ञवल्क्यः। पिता पितामहो भ्राता सकुल्यो जननी त ११०
था। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परःपरः॥ सकुल्यः प्रत्यासत्तिक्रमेण। आदौ पितृकुलस्थस्तदभा

वे मातामहकुलस्थः सर्वाभावे माता। अत एवं नारदोपि। पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः।
मातामहो मातुलश्च सकुल्यो बांधवस्तथा। माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते। तस्यामप्रकृतिस्था
यां कन्यां दद्युः स्वजातयः। याज्ञवल्क्य एव असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगि
न्यश्च निजादंशात् दत्वांशं तु तुरीयकमिति। तद्व्येतदनुसारत एव योज्यं यदा तु सर्वेषामभावस्तदा वा
ऽदद्यात्। तदा दृसएव। यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत्। अथ वानुज्ञयालस्य मतस्य
वरयेत्स्वयमिति। अथ दैविकनियमः॥ तत्र कारिकाकारः। स्नातालंकृतकन्यायाः प्राङ्मुख्याः प्रसगान
नः॥ इक्षितं तंदुलस्थायाः वरस्स्यप्रमुखवमा प्रदद्गिं ज्ञात्मतो॥ प्राक्प्रत्यगास्या वोढा हेतान्त्राहकयोः
स्थितिः। प्रत्युदद्यात्पूर्वोमुखोऽप्यमेष एव विधिः स्मृतः। प्रत्यक्ततु रवस्क्रग्रहणीया द्विवाहे तु विपर्ययः॥ त

सं॰ प्र॰ १११

त्रहेमाद्रिः अस्यसमूलत्वेऽनुष्ठानविकल्पः॥तदाप्युदक्पूर्वत्वंप्रदानवैशिष्ट्यस्मृतेस्तदनुष्ठेयं।तदु
क्तंस्मृत्यंतरे।दद्यात्स्वयमुखोदानंगृह्णीयादुत्तरामुखः।आयुर्विवर्धतेदातुर्ग्रहीतुःक्षीयतेनतत्।
तथानुक्तवत्तापिकल्पाप्रति।प्रतियायेत्याह व्यासः॥उक्त्वामनुद्वहेत्कन्यांमाविद्याग्रहणंतथा
उपोषितास्तुतांदद्याद्वितायद्विजोत्तयइति।अथमधुपर्कः।सचार्यशाखयाकार्यइत्युक्तं।रत्नपरि
शिष्टे।वरस्यपश्चान्मूसर्वातछारवागृह्यवोदित।मधुपर्कप्रदातव्योथन्यशाखेपिदातरि।लि।अ
त्रवरग्रहणमर्च्यमात्रोपलक्षणं।अथकन्यादानेमंत्राः।तदोत्ररुद्दत्रिप्रतिज्ञामंत्रावुक्तौवायवीये। १११
कन्यांकनकसंपन्नांकनकाभरणैर्युतां।दास्यामिविष्णवेतुभ्यंब्रह्मलोकजिगीषया॥विश्वंभराःसर्वभू
ताःसाक्षिण्यःसर्वदेवताः॥इमांकन्यांप्रदास्यामिपितृणांतारणायवैइतितस्यैववरप्रार्थनामंत्रैमाद

त्स्यपु॰ः।गौरींकन्यामिमांविप्रयथाशक्तिविभूषितां।गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय॥आसो
पितंत्रांतरमाह।कन्येममाग्रतोभूयाःकन्येमेदेविपार्श्वयोः।कन्येमेपृष्ठतोभूयात्त्वद्दानान्मोक्षमाप्नुया
मिति।तथापाणिग्रहणेविशेषमाहमनुः।पाणिग्रहणसंस्कारःसवर्णासूपदिश्यते।शरःक्षत्रिययाग्रा
ह्यःप्रतोदोवैश्यकन्यया।वसनस्यदशाग्राह्याशूद्रयोत्कृष्टवेदने।उत्कृष्टवेदनइतिक्षत्रियावैश्यकन्य
योरपिसंबध्यते।कन्यादेवतानुप्रजायतिः।तदुक्तंविष्णुधर्मोत्तरे।अनयंसदेवत्यंभूमिर्वैविष्णुदेव
ता॥कन्यादासस्तुदासीवप्राजापत्याःप्रकीर्तिताः।कन्याप्रतिग्रहश्चमूर्ध्निकरेवा।तदुक्तमादित्यपु
राणे।धर्मार्थोयानहोमेमंत्रंवावपेत्सतिमुच्यते।वासस्त्वथसमारोप्यकन्यांशीर्ष्ण्यथवाकरे।आन्वला
यनस्तुविशेषमाहुःकइदंकस्माअदादित्यादिष्टापिवीप्रतिगृह्णातित्वित्यंतंमंत्रंपठित्वाइत्यनुमंत्रयेत

प्राणि अभिमृज्योद्द्याणि कन्यां च सर्वत्र चैवमिति। अभिमर्शनं वरस्य दक्षिणेन सकार्यमित्युक्तं बह्वृचपरिशि
ष्टे। कन्यादानं वरेण कार्यमाह शौनकः॥ वरस्य हस्तयोर्दद्यात्पादेवनार्थेन शान्तधीः॥ तथ्या गार्ग्यगोत्राप
परमेश्वरशर्मणे। आत्रेयगोत्रप्रनवांपावर्तां प्रददाम्यहं। कान्यां सद्द्वकर्मन्यः करे त्रिः प्रतिपादितां क
न्यकादानकमेवमावरंति मनीषिण इति परिशिष्टे तु प्रतिग्रहो पित्रिरुक्तः। धर्मप्रजासिध्यर्थं कन्यां प्रति
गृह्णामीति ब्रूयादेवं त्रिरिति। अथाधिवेदनं। तत्र याज्ञः सुरापी व्याधिता धूर्ता बंध्यार्थघ्न्यप्रियंवदा स्त्री
प्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी। तथा अधिवित्ता तु भर्तव्या महदेनोन्यथा भवेत्। सुरापी स्त्र्याप्यपत ११२
त्यर्थं शरीरस्य यस्य नार्या सुरां विवेत इति स्मृत्या अपि द्विजानायाया द्विजातिशरीरार्द्धहृतायाः श्रद्धं
प्रसन्निषिद्धाया अपि सुरायानिषेधकत्वा। व्याधिता दीर्घरोगग्रस्ता। धूर्ता विसंवादिनी। बंध्या निष्फला। अ

र्थघ्न्यर्थनाशिनी। अप्रियंवदा निष्ठुरभाषिणी। स्त्रीप्रसूः स्त्रीजननी पुरुषद्वेषिणी सर्वत्राहितकारिणी। अ
धिवेदनं भार्यान्तरपरिग्रहः। मधस्यां सत्यां यधिवित्ता। मनुः। वंध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा। ए
कादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥ योगि। आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं। त्यजन् दाप्यस्तृ
तीयांशमद्रव्यो भरणं स्त्रियाः। अथ परिवेदनं मनुः। दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स वि
ज्ञेयः परिवित्तिस्तु पूर्वजः। स्थिते दाराग्निहोत्रसंयोगं विनेति शेषः। अत्राधानपरोऽग्निहोत्रशब्दः। अग्रजं वा द्व
सोदरज्येष्ठपरः तदाह गार्ग्यः। सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहं। आवसथ्यं तथाधानं पतितस्त्वन्यथा भ
वेत्। लौगाक्षिरपि। सोदर्ये तिष्ठति ज्येष्ठे योऽन्याधेयं करोति हि। तयोः पर्याहितो ज्येष्ठः पर्याधाता कनिष्ठकः॥ सो
दर्यग्रहणादसोदर्ये न दोष इत्युक्तं। तदाह कात्यायनः। पितृव्यपुत्रसापत्नपरनारीसुतेषु च। ज्येष्ठेष्वपि वति

सं०१९२

वस्तुत्वात्तृणांतु कनीयसां॥ दाराग्निहोत्रसंयोगेन दोषः परिवेदने। परनारीसुतः क्षेत्रजः॥ इदं वचनं का
देशस्थुपलक्षणं। तदाह यमः॥ पितृव्यपुत्रान्सापत्नान्परपुत्रांस्तथैव च। दाराग्निहोत्रधर्मेषु नाधर्मः परि
विंदन्॥ अत्र च। परपुत्राद्दत्तकादौ न पुत्रदानप्रतिग्रहविधेस्तु स्वपुत्रत्वोपगमात्संनवा कापलि क्षणया
पुत्रत्वपितृत्वभ्रातृत्वादिषु रितिविधिनिषेधमनादात्तु प्रतिग्रहाः एकस्य लेखाः प्रवृत्ते रिति। सोदरेष्विप्येषसति
क दारा विषय परिवेदनेक निष्टस्य न दोष इत्याह शातातपः॥ क्लीबे देशांतरस्थे च पतिते निष्क्रमे पिवा। योगशास्त्रा
नियुक्ते च न दोषः परिवेदने॥ निष्क्रमो यतिः॥ योगशास्त्राभियुक्तो विरक्तः॥ कात्यायनोपि। देशांतरस्थ क्लीबैक १२५
वृषणान सहोदरान्। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः॥ जडमूकांधबधिरकुब्ज[illegible]षोडकान्॥
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च। धनवृद्धिप्रसक्तांश्च कामतो कारिणस्तथा॥ कुहकास्तस्करांश्चोपि

परिविंदन्न दुष्यति। एकवृषण उत्पन्नावेव रोगिश्चाचिकित्स्यरोगः। षोडकोसयवरणहृदयः। अनाप्यानिष्ठि
कब्रह्मचारिणः॥ कामतोकारिणः स्वेच्छया वर्तिसंविवादसकुवर्णिणः॥ कुहकाः परवंचनायद्योधोगपराः॥ त
त्र देशांतरस्थे ज्येष्ठे वसिष्ठश्चाह। अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरं मनिविष्ठमप्रतीक्षमाणं प्रायश्चि
त्ती च भवतीति। द्वादशवर्षप्रतीक्षावधमाधर्म्ययोगतस्य तयावदेमाद्वौ स्मृतिः॥ द्वादशैव तु वर्षाणि ज्यायान्ध
र्मार्थयोगतः॥ न्याय्यः प्रतीक्षितुं भ्रातातच्छ्रूयमाणः पुनः पुनः॥ धर्मार्थयोरिति विद्याप्राप्त्युपलक्षणं। अ
न एव गौतमेन नष्टे भर्तरि षडतिमत्करस्य द्वादश वर्षाणि ब्राह्मणस्य विद्यासंबंधेनेति भार्यायान्तर्प्रतीक्षा
कालमुक्ता मिहितं भ्रातरि चैवं ज्यायसिपवीयाच्च कन्याग्न्याधेयेष्विति। नष्टे क्वगत इत्यज्ञाने अन्यंत
हृद्देशगत इति यावत्। इयं च द्वादशवर्षप्रतीक्षा कालांतरेसंनाविवाहाधिकार देशांतरस्थाविरक्ता

दानं। न पुनः सर्वथाऽसंन्ताविते प्रत्यागमन वैराग्यनिवृत्तानां। एवं वेश्यातिसक्तानां बोद्धव्यं एतदभिप्रायेणै
वाहस्मृतं तु। व्यसनासक्त विरतो वा नास्तिको वाथ वाग्रजः। कनीयान्धर्मकामस्तु आधानमथ कारमेयेत।
आधानं विवाहस्याप्युपलक्षणं। क्लीबादयस्तु वचनावत एव विवाहायोग्यत्वात्कंचिदपि कालं न प्रति
क्षणीया। तथा च कात्यायनः। उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव वा। राजयक्ष्मामयावी च न
न्याय्यः स्यात्प्रतीक्षितुं। षंडवामनकुब्जेषु गद्गदेषु जडेषु च। जात्यंधबधिरे मूके न दोषः परिवेदने। म
घ एवेति दोषः। आधानाधिकृते पि ज्येष्ठे सति तदनुज्ञया कनिष्ठो न दुष्यतीत्याह वसिष्ठः। अग्रजश्च
यदानग्निराहध्यस्त्वनुजः कथं। अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि। विवाहे तु ज्येष्ठानुज्ञायामपि ११४
दोषमाह हारीतः। सोदर्याणां तु सर्वेषां परिवेत्ता कथं भवेत्। दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्यया। अ

नुज्ञायामपि दारैः परिविद्यंते नाग्निहोत्रसोमयागाभ्यामित्यर्थः। वृद्धयोगिनु। आवसथ्यमनादसत्तेतायां
यः प्रवर्तते। सोनाहिताग्निर्नवेत्ति परिवेत्ता [illegible] व्यते। वसिष्ठस्तु परिवित्तस्त्वयैवमहपुनर्विवाहमाह। परिविवि
दानः कृच्छ्रातिकृच्छ्रं चरित्वा तस्मै दत्वा पुनर्निर्विशेत तामेवोपयच्छेतेति। तस्मैन्यपत्नीप्रदत्वानिर्विशेत पुनरुद्वहे
कोऽत्र। मित्यपेक्षायामाह तामेवोपयच्छेत ज्येष्ठेनानुज्ञातामिति। अथ दिधिषु अग्रेदिधिषु विवाः। तत्र तयो
र्लक्षणमाह देवलः। ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेनुजा। सा चाग्रेदिधिषुर्ज्ञेया पूर्वा तु दिधिषुः
स्मृता। तत्रापि विवाहे विशेषमाह वसिष्ठः। अग्रेदिधिषुपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निर्विशेत तां
चैवोपयच्छेत दिधिषुपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निर्विशेतेति। तत्राग्रेदिधिषुपतिः प्रा
यश्चित्तं कृत्वा तामेव ज्येष्ठां पश्चादन्येनोढामुद्वहेत्। दिधिषुपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां ज्येष्ठां

सं०३०००१४
न०म०२२५

तस्मैकन्यायस्याः पूर्वं विवोढ्त्वाऽन्यामुद्वहेदित्यर्थः॥ अथवा द्वावपि ययोः क्रमायाच्छिन्नानुष्ठानपू
र्वकमन्योन्यानुज्ञापूर्वकं वस्वस्वविवाहितामेव पुनर्विवदेयातामित्युक्तंम्म सर्थमर्गः॥ इति श्री
मोसोमकुलांकरमहस्फूरिसनुनहरामोदरात्मजनहसिंह्वरेण कृतनास्कारसंस्कारमयूखः॥ समा
प्तः॥ संवत् १८२६ वर्षे विशाष वदी ५ भौमे लिखितमसमाप्तं॥ ॥ ॥श्री॥ ॥कृ॥ ॥श्री॥ ॥